ले०-Acacia Arabica ( अकेसिया अरेबिका )

अं०-Acacia Tree ( अकेसिया ट्री )

**बबूर के गोंद का नाम-**

ले०-Acacia Gummi ( अकेसिया गम्मि )

अं०-Gum Arabic (गम आरेबिक्)

**व्यवहार—छाल, पत्ते, फली । मात्रा-३-९ माशे ।**

**अस्य फलनिर्यासयोर्गुणाः—**

बब्बूलस्य फलं रूक्षं विशदं स्तम्भनं गुरु ।
कषायं मधुरं शीतं लेखनं कफपित्तहृत् ॥
बब्बूलस्य तु निर्यासो ग्राही पित्तानिलापहः ।
रक्तातिसारपित्तास्रमेहप्रदरनाशनः ।
भग्नसंधानकः शीतः शोणितस्रुतिवारणः ॥ ( आ० सं० )

**२० अरिष्टकः ( रीठा ) पृ० २३०**

हि०-रीठा । बं०-रीठेगाछ, रीटे करंज । म०-रीठा, रिठा, अरिठा । गु०-अरीठा । ते०-कुकडि, कुकुड, कुकुडु, कयलु, रीठा करञ्ज मने चेट्टु । पं०-रेठा । मु०-रिथा । अ०-बुन्दकहिन्दी । फा०-फिंदक हिन्दी । क०-कुकुटे कायि । ता०-पोन्नान कोट्टइ ।

अं०-Soap Nut Tree ( सोप नट ट्री ) ।

ले०-Sapindus Trifoliatus ( सैपीन्डस ट्रिफोलियेटस् ) ।

व्यवहार—फल, छाल । मात्रा—१-३ माशे ।

अस्य गुणाः—

अरिष्टकः कटुः पाके तीक्ष्णोष्णो लेखनो लघुः ।
दोषत्रयहरो गर्भपातनो गर्भशान्तिकृत् ॥
तज्जलं वामकं पानान्नस्याच्छीर्षरुजाऽपहम् ।
अर्धशीर्षव्यथां हन्ति वमनाद्विषनाशनम् ॥

२१ पुत्रजीवः ( पितौजिया ) पृ० २३०

हि०-जियापोता, पितौजिया, पतिजिया, पतजू, पितवंजिया, पतजिया, हिनाजिय । बं०-जियापुँता, पुतजिया । म०-पुत्रजीवकवृत्त, जीवनपुत्र, जीवनपुतर । गु०-पुत्रजीवक । क०-पुत्रजीव । तै०-शीश, कुँवरजुवि, कुत्रजुवि, कन्नजुवि । प्रा०-जितापुटज ।

ले०-Putranjiva Roxburghii ( पुत्रञ्जीव रॉक्सबर्घाई )

२२ इङ्गुदी ( हिंगोट ) पृ० २३०

हि०-हिंगोट, गोंदी, गौंदी, इगुन, इंगुदी । बं०-हिंगोट, इंगुदी । म०-हिंगणबेट, हिंगणी । गु०-इंगोरिश्रो, हिंगर । क०-इंगलगिद । ते०-गाड़चेटट्टु, गरा, गारी । प०-इंगोट । द०-हिंगनबेट । ता०-ननजुन्द । अ०-हिमेलजे । अं०-Delil ( डेलील )

ले०-Balanites Roxburghii ( बेलेनाइटिस रॉक्सबर्घाई ) ।

व्यवहार—पञ्चांग, बीजगिरी । मात्रा—१-१६ रत्ती ।

अस्य फलगुणाः—

ऐङ्गुदं स्वादु तिक्तं च स्निग्धोष्णं श्लेष्मवातजित् ( शो० नि० )

अस्य पुष्पगुणाः—

अस्य पुष्पं तु मधुरं स्निग्धं चोष्णं च तिक्तकम् ।
वातं कफं नाशयतीत्येवमाचार्यभाषितम् ॥ ( नि० र० )

अस्य फलमज्जगुणाः—

इङ्गुद्याः फलमज्जको जलयुतो लेपो मुखे कान्तिदः ॥ वै० जी० ॥

२३ जिंगिनी । पृ० २३०

हि०-जिंगिनी, जीयाल, जीअल । म०-मोई, मोक । गु०-जिंगिनो,

मवेडी, मोलेड्डु, मवड़ा। क०-ओरीथ, मरम। बं०-दुलदुली। प०-काली सिम्बल। तै०-गिली गिरना। मा०-जिगप्पी।

ले०-Odina Wodier ( ओडिना वोडियर )

२४ तमाल। पृ० २३०

हि०-तमाल, श्यामतमाल, पसेंदु। बं०-तमालगाछ। म०-तमालवृक्ष। गु०-तमाल। क०-ह्रोंगेमरा। तै०-तमालु, कानुगचेट्टु। द्रा०-पुगंमरम।

ले०-Garcinia Morilla ( गर्सिनिया मोरिल्ला )।

तमालस्य नामानि गुणाश्च—

तमाल उक्तस्तापिच्छः कालस्कन्धोऽमितद्रुमः।
लोकस्कन्धो नीलध्वजो नीलतालश्च स स्मृतः॥
कालस्कन्धश्च मधुरो बल्यो वृष्यो गुरुः स्मृतः।
धातुबृद्धिकरः शीतः श्रमदाहकफापहः।
पित्तशोथं च विस्फोटं पित्तं चैव विनाशयेत्॥ नि० र०॥

२५ तूणी ( तून ) पृ० २३०

हि०-तुन, तून, तूनी, महानिम। बं०-तुन्दगाछ, तूनगाछ। म०-तूनो, नांदुरखी, नांदरूख। गु०-तूणी। को०-नांदरूख। पं०-द्रवी, तुण। गु०-म०-नन्दीवृक्ष। मा०-तूण। उ०-महालिंबु। ते०-नन्दिवृक्षमु। क०-नन्द-पट्टे। अं०-The Toon ( दी टून )।

"-Indian Mahogany Tree ( इण्डियन मेहोगनी ट्री )

व्यवहार—छाल। मात्रा—१-२ तोला।

२६ भूर्जपत्रः ( भोजपत्र ) पृ० २३१

हि०-भोजपत्र, भूजपत्र, भोजपत्तर। बं०-भूर्ज्जिपत्र, भूज्जिपत्र। म०-भूर्जपत्र। प०-गु०-म०-भोजपत्र। ते०-भोजपत्रमु। क०-भुजपत्र। द्रा०-भुजपत्रं। ने०-फटक। अं०-The Birch ( दी बर्च )

ले०-Betula Utilis ( बेटुला यूटिलिस )।

२७ पलाशः ( ढाक ) पृ० २३१

हि०-ढाक, पलाश, परास, टेसू, केसू, धारा, कांकरिया, छिउल। बं०-पलाश गाछ। म०-पलश। गु०-खाखरो। मु०-खाकरो। क०-मुत्तलु,

मुत्तुलु, मदु गद गिड़ । ते०-मातुका चेट्टु, मोदुगु । ता०-परशन । उ०-पराशु । मा०-छिवरो । द्रा०-पेलाशं । पं०-पलाश । फा०-फल्हह ।

अं०-The Forest Fame ( दि फारेस्ट फेम ) ।

ले०-Butea Frondosa ( ब्युटिया फ्राण्डोसा ) ।

सफेद्फूल पलास का लैटिन नाम—

Butea Parviflora ( ब्युटिया पार्वीफ्लोरा ) है ।

अस्य भेदाः—

रक्तः पीतः सितो नीलः कुसुमैस्तु विभज्यते ।
किंशुकैर्गुणसाम्येऽपि सितो विज्ञानदः स्मृतः ॥

अस्य बीजनूतनपल्लवयोर्गुणाः—

फलबीजं च स्निग्धोष्णं कटु क्रिमिकफाञ्जयेत् ।
नूतनाः पल्लवाश्चास्य कृमिवातविनाशकाः ॥ नि० र० ॥

अस्य निर्यासमूलस्वरसयोर्गुणाः—

पलाशभवनिर्यासो ग्राही च त्तपयेद् ध्रुवम् ।
ग्रहणीं मुखजान् कासाञ्जयेत् स्वेदातिनिर्गमम् ॥ ( आ० सं० )
पलाशमूलस्वरसो नेत्रच्छायान्ध्यपुष्पजित् ।
तद्बीजं कृमिविध्वंसि हितः काण्डो रसायने ॥ शो० नि० ॥

हस्तिकर्णपलाशस्य नामानि गुणाश्च—

तद्भेदे स्यात् किंशुलुकः किञ्चुलो हस्तिकर्णकः ।
हस्तिकर्णः परं वृष्यो मेधाऽऽयुर्बलवर्धनः ॥ रा० नि० ॥

२८ शाल्मलिः ( सेमर ) पृ० २३१

हि०-सेमर, सेम्हल, सेमल, शेम्बल । बं०-शिमुलगाछ, रक्तो सिमुल । म०-कांटे सावर, शेमला, शेवरी, सांवरी । गु०-शेमलो, शिमुल । ते०-रुगचेट्टट, मुन्दल बुराग चेट्टु । ता०-पुला, शानमली । मा०-शेमल, सरमलो । क०-यबल बद्मर । द्रा०-यलबंगरम् । पं०-सिम्बल ।

अं०-Silk Cotton Tree ( सिल्क काटन ट्री ) ।

ले०-Bombax Malabaricum ( बौमबैक्स मालाबारिकम् )

व्यवहार—मुसला, छाल, फूल । मात्रा—३-९ माशे ।

अस्य त्वग्रस-पुष्प-फल-कन्दानां गुणाः—

त्वग्रसोऽस्या ग्राहकः स्यात्तुवरः कफनाशनः।
पुष्पं तु शीतलं पित्तं गुरु स्वादु कषायकम्।
वातलं ग्राहकं रूक्षं कफपित्तविनाशकम्।
रक्तदोषहरं चैव गुणा ह्येते फलस्य च॥
कन्दोऽस्य मधुरः शीतो मलस्तम्भकरो मतः।
शोफं दाहं च पित्तं च सन्तापं चैव नाशयेत्॥ नि० र०॥

२९ मोचरस। पृ० २३१

हि०-मोचरस, सेमरका गोंद। बं०-मोचरस, शिमुलेर आटा। म०-सांवरीचा डीक। गु०-शेमलानो गुन्द। क०-बूरल अंटुम्याण। ते०-बूरगुबंग। क०-यलबद्ह गिनुं। द्रा०-यलबंप शिन।

अं०-Gum Of Silk Cotton Tree ( गम ऑफ् सिल्क काटन ट्री )

व्यवहार—गोंद। मात्रा—२-४ माशे।

३० कूटशाल्मलिः ( कालासेमर ) पृ० २३२

हि०-काला सेमल, कूटसेमर, रोहिड़ा। बं०-रक्तरोहितक। म०-रक्त रोहिरा, काली साम्बरो। गु०-रगतरोहिरा। क०-मुल्ल मुत्तल।

इसका एक भेद और होता है, जिसका फूल-सफेद होता है, फल—सेमर से छोटा होता है।

३१ धवः ( धौं ) पृ० २३२

हि०-धाय, धों, धव, धौं, धववृक्ष। बं०-धाउया गाछ, धाओया गाछ। म०-धावडा, धामोड़ा। गु०-धावड़ो। क०-सिरिवरु। तै०-नारिरूचचेट्टु। प०-धौं, कहुवा। मा०-धोकड़ो।

ले०-Anogeissus Latifolia ( एनोजिस्सस लैटीफोलिया )।
"-Conocorpus Latifolia ( कोनोकार्पस लैटोफोलिया )।

अस्य फलमूलयोर्गुणाः—

फलं चास्य हिमं स्वादु रूक्षं च तुवरं मतम्।
मलस्तम्भकरं चैव वातलं कफपित्तजित्।
मूलं कटु कषायं च पित्तकृद् दीपनं परम्॥ नि० र०॥

३२ धन्वङ्गः ( धामिन ) । पृ० २३२

हि०–धामिन, धामन । म०–धामणी चा वृक्ष । गु०–धामण । बं०–धामना गाछ, धाओया वृक्षभेद ।

ले०–Grewia Tiliaefolia ( ग्रीविआ टीलियेफोलिया ) ।

धन्वनस्य नामानि गुणाश्च—

धन्वनः पिच्छिलत्वक्च धनुर्वृक्षो महाबलः ।
धन्वनस्तुवरो वृष्यो मधुरः कटुको मतः ॥
बल्यो रूक्षो लघुश्चैव धातुवृद्धिकरो मतः ।
किञ्चिदुष्णश्च संप्रोक्तो व्रणरोपणकारकः ॥
कफवातहरो दाहशोषकण्ठरुजाऽपहः ।
रक्तरुक्पित्तकासघ्नः पीनसस्य विनाशकः ।
फलं चास्य स्वादु शीतं तुवरं कफवातहम् ॥

३३ करीरः ( करील ) पृ० २३२

हि०–करीर, करील, करेल, कचड़ा, सेंत । बं०–करील । म०–नेवती, नेपती, धट्ट भारंगी, कारवी । गु०–केरडो, केर, करेडी । क०–तिप्प तिगे, निष्पतिगे । तै०–कवर कुराक, एनुग दन्त मुमोदतु । फा०–कबार । पं०–पेंचू, पैंचू, टींट, कचड़ा, करीर ।

लै०–Capparis Aphylla ( कैपेरिस ऐफिल्ला ) ।

अं०–Caper ( केपर ) ।

अस्य पुष्पफलयोर्गुणाः—

तत्पुष्पं कफवातघ्नं कटु पाकरसं लघु ।
सृष्टमूत्रपुरीषं च सदा पथ्यं रुचिप्रदम् ॥
बालं चास्य फलं पाके कटुकं श्लेष्मशोथजित् ।
कषायं वातलं तिक्तं तत्पक्वं कफपित्तजित् ॥ शो० नि० ॥

३४ शाखोटः ( सिहोरा ) पृ० २३२

हि०–सहोरा, सिहोड़, सिहोरा ( ड़ा ), सिहोर । बं०–शेओड़ा, श्याओड़ा, शेउड़ा गाछ । म०–सहोड़, सागसहोड़ा, साहोड़ । गु०–साहोड़ा । तै०–भारिणिके चेट्टु, भारणिके चेट्टु । क०–आखोड़ मरण ।

ले०-Streblus Asper ( स्ट्रेब्लस् अस्पर ) ।

३५ वरुणः ( वरना ) पृ० २३३

हि०-बरुन, बरना । बं०-बरुनगाछ, वरुणगाछ । म०-बायवरणा, वायवर्णा । को०-भाटवरणा, हाडवरणा, हाटवर्णा । गु०-वरणो । क०-मद्वसले, उळिभिरी बसले । तै०-उरुमट्टि, जाजिचेट्टु, उलिमिरि चेट्टु । ता०-मरलिंगम । मु०-बायवर्णा । प०-वरना । मा०-वरणो ।

ले०-Crataeva Religiosa ( क्रेटिवा रिलिजिओसा ) ।

व्यवहार—छाल, पत्ते । मात्रा—४ माशे से १ तोला ।

अस्य पुष्पफलयोर्गुणाः—

पुष्पं चास्य च ग्राहकम् ।<br>
रक्तदोषहरं चैव फलं चास्य सरं गुरु ।<br>
पाके तु मधुरं स्वादु स्निग्धोष्णं वातनाशकम् ।<br>
पित्तं कफं नाशयतीत्येवं च मुनिभिर्मतम् ॥ नि० र० ॥

३६ कटभी । पृ०।२३३

हि०-कटभी, करही, हरिमल, काळो कटभी । म०-वाकुम्भा । गु०-टीवरु, बापुंगा । क०-वेल्लाळ ।

अं०-Careys Tree ( केरीस ट्री ) ।

ले०-Carelya Arborea ( केरिल्या आर्बोरिया ) ।

श्वेतकटभीनामानि—

सितादिकटभी श्वेतकिणिही गिरिकर्णिका ।<br>
शिरीषपत्री कालिन्दी शतपादा विषघ्निका ॥<br>
महाश्वेता महाशौण्डी महादिकटभी दश ।<br>
कटभी चेत्कटुरुष्णा गुल्मविषाध्मानशूलदोषघ्नी ।<br>
वातकफाजीर्णरुजां शमनी श्वेता च तत्र गुणयुक्ता । (रा० नि०)

३७ मोक्षः ( मोखा ) पृ० २३३

हि०-मोखा, फरवाह, मोषा, कठपाढ़र, कठपाढ़ल । बं०-घण्टापारुल । म०-मोखाडा, मोकड़ी, मोखावृक्ष, मोखे, पारुल । गु०-मरखो । क०-मोख दळाई, मोक्के । तै०-मोक्कपु चेट्टु, मुष्क तुंडु चेट्टु, मोक्कमु । मा०-मोखा । पं०-घण्टापाटली ।

ले०-Schreberaswiete Nioibes (स्क्रीबीरास्वीटे निओइबिस)

**मोक्षद्वयस्य गुणाः—**

मुष्कक: कटुकोऽम्लश्च रोचनः पाचनः परः ।
प्लीहगुल्मोदरार्त्तिघ्नो द्विधा तुल्यगुणान्वितः ॥ रा० नि० ॥

**अस्य पुष्पफलनिर्यासानां गुणाः—**

पुष्पं कुष्ठहरं ज्ञेयं वातपित्तकफप्रणुत् ।
फलमग्नेर्दीप्तिकरं भेदकं रोचकं मतम् ॥
गुल्ममेहार्शःपाण्डुघ्नं शुक्रदोषोदरं जयेत् ॥ नि० र० ॥
निर्यासोऽस्य परं वृष्यः शोषपित्तानिलापहः ॥ म० नि० ॥

यह सफेद और काला भेद से दो प्रकार का होता है ।

३८ जलशिरीषिका ( ढाढोन ) पृ० २३३

हि०-जलसिरस, जलसिरिस, ढाढोन, टिंटिनी । म०-जलशिरसी, जलसिरिसी । गु०-जलसरसडियो ।

३९ शमी ( छोंकर ) पृ० २३३

हि०-छोकर, शमी, सफेदकीकर, छिकुर, छोकरा । बं०-शांई, शाई-बावला, शाईगाछ, छुंईबावला । म०-शमी, खैरी । गु०-खीजडो, खिज-ड़ी । क०-बन्नि, काबन्नि, बनि, बन्निमर । तै०-शमीचेट्टु, जम्मि । उ०-शुमि । मा०-खेजड़ी । प०-जंड, जंडी । द्रा०-वन्निमरं ।

ले०-Prosopies Spicigera ( प्रोसोपिस स्पाइसीगेरा ) ।

अं०-Spunge Tree ( स्पञ्ज ट्री ) ।

**अस्याः फलगुणाः—**

फलं तीक्ष्णं च पित्तलम् ।
मेध्यं गुरु स्वादु रूक्षमुष्णं केशहरं परम् ॥

४० सप्तपर्णः ( सतौना ) पृ० २३४

हि०-सतौना, सतवन, छेतिवन, सतिवन, छतवन, छातियान । बं०-छातिमगाछ, छेतेन, छातिम । म०-सात्विण, सातविण, सातवण । गु०-सात्विन, सप्तपर्णा, सातवीण । क०-एलेलेग, एलेलग । तै०-एडाकुल, अरिटाकु । मु०-छातविण । प०-सतोना । ता०-एभ्मिल इप्पालइ ।

लै०-Alstonia Scholaris (आल्स्टोनिया स्कोलेरिस )।

व्यवहार—छाल। मात्रा-१-२ माशे।

४१ तिनिशः ( तिरिच्छ ) पृ० २३४

हि०-तिनिश, तिरिच्छ, तिनसुना, जरिल, जारुल। बं०-तिनाश, सादनगाछ। म०-तिवस। गु०-हम्मो, मिणोहम्मो। क०-स्यन्दन, हुलगति। पं०-तिरिच्छा।

लै०-Lager Straemia Flod Reginae
( लाजर् स्ट्रेमिया फ्लोड रेजिने )

एक दूसरी जातिका तिरिच्छ वृक्ष होता है जिसका लैटिन नाम—
Ougeinia Dalbergia Oides ( ओजीनिया डालबर्जिया ओईडिस् ) है।

व्यवहार—छाल, गोंद। मात्रा-१-४ माशे।

४२ भूमीरुहः ( सागोन ) पृ० २३४

हि०-सागन, सागवन, सागुवान, सेगुन। बं०-सेगुनगाछ। म०-गु०-साग, सागवन, शाग, सोयें। क०-नैगु, न्याग। तै०-टेकुचेट्टु, टेंक। ता०-टेकु। फा०-फिलगोस। अ०-फिलजोश, उजनुल पिल। मा०-सागवान। लै०-Tectona Grandis ( टेक्टोना ग्राण्डिस )

अं०-Indian Teak Tree ( इण्डियन टीक ट्री )

अस्य पुष्पवल्कलयोर्गुणाः—

अस्य पुष्पं तु तुवरं तिक्तं च विशदं लघु।
वातप्रकोपणं रूक्षं कफपित्तप्रमेहनुत्॥
वल्कलं चास्य मधुरं रूक्षं च तुवरं मतम्।
कफनाशकरं चैव मुनिभिः परिकीर्त्तितम्॥ ( नि०र० )

इति षष्ठो वटादिवर्गः॥ ६॥

# अथ सप्तम आम्रफलादिवर्गः ॥ ७ ॥

१ आम्रः ( आम ) पृ० २३४

हि०—आम । बं०—आम्र । म०—आम्बा । गु०—आम्बो । ते०—माविडो, मामिडिकाय, मामिंडिचेट्टु । ता०—मामर, मामरं । मा०—आम्बो । क०—माविनकायि, माविनफल, मावयहरोण । द्रा०—मांगाय । फा०—आंबा, अम्बे । अ०—अम्बज । अं०—Mango Tree ( मैङ्गो ट्री )

ले०—Mangifera Indica ( मंगीफेरा इण्डिका )

व्यवहार—फल, छाल । ६ माशे से १ तोला ।

आम्ररसस्य दुग्धेन सह प्रयोगे गुणाः—

स वै दुग्धेन संयुक्तः कान्तिदः स्वाददः स्मृतः ।
वृष्यश्चान्ये गुणाः प्रोक्ता रसेन सदृशाः स्मृताः ॥ (नि०र०)

चोषिताम्रगुणाः—

चोषिताम्रो बलरुचिवीर्यवृद्धिकरः परः ।
लघुता शीतता शीघ्रपाकता वातपित्तनुत् ॥
मलबन्धकरश्चैव पूर्ववैद्यैरुदीरितः ।

शस्त्रच्छिन्नाम्रगुणाः—

पक्वः स्याच्छस्त्रच्छिन्नाम्रो जाड्यमाधुर्यशीतकृत् ।
रुचिकृच्चिरपाकश्च धातुवृद्धिं करोति सः ।
बलकर्त्ता वातपित्तनाशनः परिकीर्त्तितः ॥ नि० र० ॥

मधुघृतयुक्ताम्रयोर्गुणाः—

मधुना तत्क्षयप्लीहवातश्लेष्महरं परम् ।
सघृतं वातपित्तघ्नं दीपनं बलवर्णकृत् ॥ रा० व० ॥

आम्रास्थितैलगुणाः—

आम्रतैलं तु तुवरं स्वादु रूक्षं च तिक्तकम् ।
सुगन्धि मुखरोगस्य नाशनं कफवातनुत् ॥ नि० र० ॥

आम्रत्वचाऽऽदिगुणाः—

आम्रत्वचा कषाया च मूलं सौगन्धि तादृशम् ।
रुच्यं संग्राहि शिशिरं पुष्पं तु रुचिदीपनम् ॥

आम्रान्तस्त्वग्गुणाः—

आम्रान्तस्त्वग्ग्राहिणी तु तुवरा दाहकारिणी ।
पित्तमेहकफानां च नाशिनी योनिशुद्धिकृत् ॥

आम्रमूलगुणाः—

आम्रमूलं तु तुवरं ग्राहि शीतं रुचिप्रदम् ।
सुगन्धि कफवातानां नाशनं परिकीर्त्तितम् ॥

आम्रपल्लवगुणाः—

आम्रच्छदस्तु तुवरो ग्राहको रुचिकारकः ।
वातपित्तकफान् हन्तीत्येवं च परिकीर्त्तितम् ॥ ( नि० र० )

२ आम्रावर्त्तः ( अमावट ) पृ० २३६

हि०-अमावट, आमावट, अंबावट, आमका सत्त, आम को रोटी । बं०-आम्रसत्व, आमट । म०-आंब्याचे साट ।

३ आम्रातकः ( अम्बाडा ) पृ० २३६

हि०-अम्बाडा, अमड़ा, अमरा, अमला, आमड़ा । बं०-आमडा, आमड़ा । म०-अंबांडा, आंबचार । गु०-जंगली आँबो, अंमेडा, अबेडा । क०-आँबोडेकायि । तै०-आमाटं, अंबालमु । पं०-अमरा, अंबड़ा ।

अं०-Hogplum ( हौगप्लम )

ले०-Spondias Mangifera ( स्पोण्डिअस मैङ्गोफेरा )

व्यवहार—फल, पत्ते । मात्रा-४-९ माशे ।

यह देशी व विलायती भेद से दो प्रकार का होता है ।

अस्य पर्णगुणाः—

पर्णं तु कोमलं चास्य रुच्यं ग्राह्यग्निदीपनम् ॥ (नि० र० )

४ राजाम्रः ( कलमी आम ) पृ० २३७

हि०-कलमी आम, मालदह । बं०-लता आम । म०-राजआम्बा । गु०-हाफुस आम्बो । क०-रायमच्चू । ते०-राच मामिडी चेट्टु ।

बालं राजफलं कफास्रपवनं।श्वासातिपित्तप्रदं·
मध्यं तादृशमेव दोषबहुलं भूयः कषायाम्लकम् ।
पक्वं चेन्मधुरं त्रिदोषशमनं तृष्णाविदाहश्रम
श्वासारोचकमोचकं गुरु हिमं वृष्याति भूपाह्वयम् ॥

५ कोशाम्रः ( कोशम्भ आम ) पृ० २३७

हि०–कोशंभ, छोटा आम, कोसम, कोशाम्र, क्षुद्राम्र, वनाम्र । बं०–केआंडा, जलपाइ । क०–जूरिमाचु, कोंड मामिडि । म०–कोशिंब, लाल रान आंबा । गु०–हलकी जातनो आंबो, डंगरी आंबो, कोशम । प०–कोशाम, कोशाम्र, झारी आंबा । द्रा०–वेड्ड्द मावु ।

ले०–Schleichera Trijuga ( स्क्लेचेरा ट्राईजगा ) ।

कोशाम्रमज्जागुणाः—

स्वादुपाकोऽग्निबलकृत् स्निग्धः पित्तानिलापहः ॥ सु० सं० ॥

अस्य तैलगुणाः—

सरं कोशाम्रजं तैलं कृमिकुष्ठव्रणापहम् ।
तिक्ताम्लमधुरं बल्यं पथ्यं रोचनपाचनम् ॥ रा० नि० ॥

६ पनसः ( कटहर ) पृ० २३७

हि०–कटहर, कटहल, कठैल, कठैर, पनस । बं०–कांटाल, कांठाल । म०–फणस । गु०–फनस । क०–हलसिन, हन्नु ( ण्णु ) । ते०–पनसकायि, पनस पांडु । ता०–पेलाकायि, पिल्ला, पिलापंजहम ।

लै०–Antiaris Toxicaria ( आंटिएरिस टोक्सिकेरिया ) ।

अं०–Jack Fruit Tree ( जैक फ्रूट ट्री ) ।

अस्य पुष्पगुणाः—

अस्य पुष्पं गुरु तिक्तं मुखशुद्धिकरं मतम् ॥ ( नि० र० )

अस्य कोमलामफलगुणाः—

कोमलं तच्च मधुरं गुरु बल्यं कफप्रदम् ।
मेदोवृद्धिकरं चैव दाहवातप्रपित्तनुत् ॥ नि० र० ॥

७ लकुचः ( बड़हल ) पृ० २३७

हि०–बड़हल, बरहर, बरहल । बं०–डेओ, मादर, मान्दार गाछ, डेलो मान्दार, डहुया गाछ, डेयो मादार, डहुक । म०–बठार फल, क्षुद्र फणस, बटार फल । गु०–क्षुद्र पनस, लकुच । पं०–बड़हल । मा०–बड़हर ।

लै०–Antiaris Lakoocha ( ऐएटीयेरिस लकुचा ) ।

८ कदली ( केला ) पृ० २३८

हि०–केला, कदली, केरा, केदली । बं०–केला, कला । म०–केल, सोन-

केळ, मुंठेळी, लोखंडी, आवेली, चवई । गु०-केलुं, केल्य । क०-बालि, भरवाले काष्ठ, कावालेतब । तै०-अरटि, चक्राकेली, काग्रा, आरटीचेट्ट । फा०-मावज, मोज़, मोम्न । अ०-तना, मोजिद्तिला । ता०-पाजम, व्रन पिपसी । अं०-Plantain ( प्लेण्टेन )

ले०-Musa Sapientum ( मुसा सेपिएण्टम )

व्यवहार—स्तम्भरस । मात्रा—१-२ तोले ।

कोमलमध्यमकदलीफलयोर्गुणाः—

कोमलं कदलं शीतं मधुरं च कषायकम् ।
रुच्यमम्लं समुद्दिष्टं पित्तनाशकरं च तत् ॥
मध्यमं कदलं किंचित्तुवरं मधुरं गुरु ।
अग्निमान्द्यकरं चैव ऋषिभिः परिकीर्त्तितम् ॥

कदलीपुष्पगुणाः—

पुष्पं कदल्याः सुस्निग्धं मधुरं तुवरं गुरु ।
ग्राहि तिक्तं चाग्निदीप्तिकरं वातविनाशनम् ॥
किंचिदुष्णं च वीर्ये स्याद्रक्तपित्तं त्तयं क्रमीन् ।
पित्तं कफं नाशयतीत्येवं च ऋषिभिर्मतम् ॥ नि० र० ॥

कदलीमोचकगुणाः—

कदलीमोचकं हृद्यं कफघ्नं क्रिमिनाशनम् ।
तृष्णाप्लीहज्वरं हन्ति दीपनं वस्तिशोधनम् ॥ रा० व० ॥

कदलीजलगुणाः—

रम्भातोयं शीतलं ग्राहि तृष्णाकृच्छ्रान्मेहान्कर्णरोगातिसारान् ।
अस्रस्रावं स्फोटकान् रक्तपित्तं दाहं हन्यादस्रयोनिं च शोषान् ॥

कदलीकन्दगुणाः—

बल्यः कदल्याः कन्दः स्यात्कफपित्तहरो गुरुः ।
वातलो रक्तशमनः कषायो रूक्षशीतलः ॥
कर्णशूलरजोदोषं सोमरोगं नियच्छति ॥

कदलीसारगुणाः—

सारं कदल्याः संग्राहि चाप्रियं गुरु शीतलम् ।
तृड्दाहमूर्च्छाकृच्छ्रातिसारमेहांश्च सोमकम् ॥

अस्थिस्रावं रक्तपित्तं विस्फोटांश्चैव नाशयेत् ॥

आरण्यकदलीगुणाः—

आरण्यकदली शीता मधुरा बलवर्धिनी ।
वीर्यवृद्धिकरी रुच्या दुर्जरा च गुरुः स्मृता ॥
तृड्दाहशोषपित्तानां नाशिनी च प्रकीर्त्तिता ।
फलं तु तुवरं चास्या मधुरं च गुरु स्मृतम् ॥

काष्ठकदलीगुणाः—

काष्ठस्य कदली ग्राही हृद्या रुच्या च शीतला ।
अग्निमान्द्यकरी गुर्वी दुर्जरा चातिमाधुरी ॥
तृड्दाहमूत्रकृच्छ्राणां रक्तपित्तस्य नाशिनी ।
विस्फोटं चास्थिरोगं च नाशयेदिति कीर्त्तिता ॥

सुवर्णकदलीगुणाः—

सुवर्णकदली शीता मधुरा चाग्निदीपनी ।
बल्या वृष्या च गुर्वी च तृड्दाहकफनाशिनी ॥ नि० र० ॥

चम्पककदलीगुणाः—

तदेव चम्पकाख्यं तु वातपित्तहरं गुरु ।
वृष्यं चैवातिशीतं च मधुरं रसपाकयोः ॥ रा० व० ॥

महेन्द्रकदलीगुणाः—

महेन्द्रकदली चोष्णा वातस्य च विनाशिनी ।
प्रदरं पित्तरोगं च नाशयेदिति कीर्त्तिता ॥

कृष्णकदलीफलगुणाः—

कृष्णा तु कदली रुच्या तुवरा मधुरा लघुः ।
वायोर्धातोर्वृद्धिकरी मेहपित्ततृषाहरा ॥ नि० र० ॥

### ९ चिर्भिटम् ( फूट ) पृ० २३८

हि०–फूट, फूंट, कचरिया, सेंध, गोरख ककड़ी । बं०–फुटि, गोमुक, काकुड़ । म०–शेंदार, चिभूड़, शेंदाड़ । गु०–कोठीबा, चिभड़ा, चिभड़ू । ता०–ककरीकै । ते०–पेड्डुकै, पेड्डुदोसरै, बुरड रंग पंडु । फा०–खयार ।

ले०–Cucumis Momordica ( क्युक्युमिस मोमोर्डिका )

आमशुष्कचिर्भिटफलयोर्गुणाः--

बाल्ये तिक्ता चिर्भिटा किंचिदम्ला गौल्योपेता दीपनी सा च पाके।
शुष्का रूक्षा श्लेष्मवातारुचिघ्नी जाड्यघ्नी सा रोचनी दीपनी च॥

चिर्भिटपुष्पगुणाः--

पुष्पं च चिर्भिटस्यैव दोषत्रयकरं स्मृतम्।
अपक्वं जीर्णकफकृत् पक्वं किंचिद्विशिष्यते॥ हा० सं०॥

चिर्भिटभेदमृगाक्षीनामगुणाः--

मृगाक्षी श्वेतपुष्पा च मृगेर्वारुर्मृगादनी।
चित्रवल्ली बहुफला कपिलाक्षी मृगेक्षणा॥
चित्रा चित्रफला पथ्या विचित्रा मृगचिर्भिटा।
मरुजा कुम्भसी देवी ज्ञेया चैकोनविंशतिः॥
मृगाक्षी कटुका तिक्ता पाकेऽम्ला वातनाशिनी।
पित्तकृत् पीनसहरा दीपनी रुचिकृत् परा॥ रा०नि०॥

१० नारिकेलः ( नारियल ) पृ० २३८

हि०-नारियल, नरियल, नरियर, खोंपड़ा, गरी, गिरी। बं०-नारिकेल, नारकोल, नारिकोल गाछ। म०-नारली, नारल, माड़। गु०-नालीएर, नालीयर, नारीयेल। ते०-टेंकाया, नारिकदम, टेंकाई चेट्टु। ता०-तेंगाई, टेन्ना, टेंगा। फा०-जोज हिन्दी नारीयल, नारगील। अ०-नारजिल। मु०-नारली। क०-नारियल, नारियल रसु, तेंगिनमर। उ०-नड़िया। मा०-नारेल। द्रा०-तेंगाई।

अं०-Coconut Palm ( कोकोनट पाम )

ले०-Cocos Nucifera ( कोकस न्यूसीफेरा )

व्यवहार--गिरी। मात्रा--१-१॥ तोला।

पक्वशुष्कनारिकेलफलगुणाः--

पक्वं च नारिकेलं तु दाहकं पित्तलं गुरु।
वृष्यं मलस्तम्भकरं रुचिदं मधुरं मतम्॥
दीपनं बलकृत् प्रोक्तं वीर्यस्य च विवर्धकम्।

नारिकेलफलं शुष्कं दुर्जरं दाहकं गुरु ।
स्निग्धं मलस्तम्भकरं बलवीर्यरुचिप्रदम् ॥

तरुणादिनारिकेलाम्बुगुणाः--

नारिकेलाम्बु तरुणं तृष्णाघ्नं पित्तनाशनम् ।
बालस्य नारिकेलस्य जलं प्रायो विरेचनम् ॥
शीतं वमथुमूर्च्छाघ्नं पित्तज्वरविनाशनम् ।
नारिकेलोदकं जीर्णं विष्टम्भि गुरु शीतलम् ॥ रा० व० ॥

नारिकेलपुष्पगुणाः—

नारिकेलस्य पुष्पं तु शीतं रक्तातिसारहृत् ।
रक्तपित्तं प्रमेहं च सोमरोगं च नाशयेत् ॥
मलस्तम्भकरं चापि प्रोक्तं पूर्वमनीषिभिः ॥ नि०र० ॥

नारिकेलपुष्पजलगुणाः--

नारिकेलपुष्पजलं गुरु वृष्यं प्रकीर्त्तितम् ।
तत्कालमदकृत् प्रोक्तं चातिस्निग्धमुदीरितम् ॥
तच्चेदम्लं कफकरं पित्तलं कृमिवातनुत् ॥ नि० र० ॥

नारिकेलतरुतोय ( ताडी ) गुणाः--

नारिकेलतरुतोयमतीव स्निग्धमाशु मदकृद् गुरु वृष्यम् ।
साम्लभावमुपयात्यपराह्णे श्लेष्मपित्तजनकं च कृमिघ्नम् ॥

नारिकेलफलतैलगुणाः--

नारिकेलफलोद्भूतं तैलं वाजीकरं गुरु ।
पोषणं क्षीणधातूनां वातपित्तप्रणाशनम् ॥
मूत्राघाते प्रमेहे च श्वासे कासे च यक्ष्मणि ।
मेधालोपे च हितदं क्षतानां भरणं तथा ॥

मधुनारिकेलगुणाः--

मोहजातीयकं नाम नारिकेलं च शीतलम् ।
मधुरं पुष्टिकृद् बल्यं रुच्यं चाग्निप्रदीपकम् ॥
कान्तिजन्तुकरं स्निग्धं कफस्यामस्य कोपनम् ।
कामवृद्धिकरं देहस्थैर्यकृद्दाहनाशनम् ॥
तृषां पित्तं श्रमं वातमतिसारं च नाशयेत् ॥

११ कालिन्दम् ( तरबूज ) पृ० २३९

हि०-तरबूज, तरबूजा, कालिन्द, हिनवाना, हिन्दोना । बं०-तरमुज, चेलना । म०-कालिंगड, खडुया । गु०-तड़बूच, कालिंगडु । क०-कौंडे । ते०-पुच्चकाया, तरबूजं । फा०-हिन्द्वाना, हीनवाना, हिन्दवानह । अ०-बत्तिख हिन्दी, जकी ॥

अं०-Water Melon: ( वाटर मेलन )

ले०-Citrullus Vulgaris ( सिट्रुलस वलगेरिस )

व्यवहार—बीज । मात्रा—६ माशे से १ तोले ।

अस्य मज्जपर्णयोर्गुणाः—

मज्जा तु मधुरो बल्यो रुचिकृद्धातुवर्धकः ।
पर्णं तिक्तं रक्तवृद्धिकरं चैव प्रकाशितम् ॥ नि० र० ॥

१२ खर्बूजम् ( खरबूजा ) पृ० २३९

हि०-खरबूज, खरबूजा, खर्बूजा, लालमी । बं०-खरबुजा, खरमुज । म०-खर्बुज, खरबूज । गु०-तलिया शकर टेटी, तलिया भीभड़ा । ते०-खरबूजं । क०-खढ़ज सौते, खडज सौते, षड़्भुजा । फा०-खरपुजह, खरपुजा । अ०-बितिख, खर्पुजह, खरपुजाह । अं०-Melon ( मेलन ) ।

ले०-Cucumis Melo ( क्युक्युमिस मेलो ) ।

व्यवहार—बीज । मात्रा—६-९ माशे ।

१३ त्रपुसम् ( खीरा ) पृ० २३९

हि०-खीरा, बालम खीरा । बं०-चीरा, शशा, शंसा, समा । म०-तासे, कांकड़ी, खिरा, कर्कटी । क०-तसेयकायि, तवसें । गु०-तांसली, तासली । ते०-दोस कइय, दोस काइ । ता०-महेबेहरी, मुल्लु वेल्लेरि । फा०-शियार खुर्द, खयार, वादरङ्ग । अ०-कंशद ।

अं०-Cucumber ( क्युकम्बर )

ले०-Cucumis Sativus ( क्युक्युमिस सेटिवस )

व्यवहार—बीज । मात्रा—६-९ माशे ।

एक बड़ी जाति का खीरा होता है, जिसे "बालमखीरा" कहते हैं ।

१४ गुवाकः ( सुपारी ) पृ० २३९

हि०–सुपारी, सोपारी, सुपाड़ी, कसेली, कसैली, कसईली । बं०–शुपारी, सुपारी, सुपारि । म०–सुपारी, पोफल । गु०–सोपारी, सुपारी, शोपारी । क०–कडिके यहेसरु, अडिके आड़िके, अढ़केय सरनु । तै०–पोकाकाया, क्रमकमु, पोक । फा०–पोपिल । अ०–फोफिल । मा०–सुपारी । द्रा०–पाक । उ०–गुया । प०–सुपारी ।

अं०–Betal Nut Palm ( बेटल् नट् पाम )

ले०–Areca Catechu ( एरीका कटेचू )

व्यवहार—फल । मात्रा—१-४ माशे ।

पक्वशुष्कगुवाकफलयोर्गुणाः—

पक्वं तु वातलं रूक्षं भेदनं कफनाशनम् ।
शुष्कमग्निकरं पूगं कषायं मधुरं परम् ॥
पूगमादौ विषं घोरं द्वितीये भेदि दुर्जरम् ।
तृतीयादिषु पातव्यं सुधातुल्यं रसायनम् ॥

आन्ध्रादिदेशोद्भवपूगफलगुणाः—

आन्ध्रोद्भवं पूगफलं पाके तु मधुरं मतम् ।
किंचिदम्लं च तुवरं कफवातविनाशकम् ॥
मुखजाड्यकरं चैव मुनिभिः परिकीर्त्तितम् ॥
चम्पावतीभवं पूगं पाचनं चाग्निदीपनम् ।
बलप्रदं रसाढ्यं च कफनाशकरं मतम् ॥
रोंठसंज्ञं पूगफलं रुच्यं चाग्निप्रदीपनम् ।
कटुकं तुवरं चोष्णं पित्तलं मलरोधकृत् ॥
बल्गुलग्रामजं पूगं रुच्यं चाग्निप्रदीपनम् ।
पाचनं च त्रिदोषघ्नं मलस्तम्भाम्रमेदहृत् ॥
चन्द्रापुरभवं पूगं रसे च मधुरं मतम् ।
कटुकं तुवरं रुच्यं स्वादु चाग्निप्रदीपनम् ॥
पाचनं मुनिभिः प्रोक्तं कफनाशकरं मतम् ।
गुहागरोद्भवं पूगं मधुरं तुवरं लघु ॥

कटुकं द्रावकं चैव पाचकं विशदं मतम् ।
मलस्तम्भं तथाऽऽध्मानं वातं चैव विनाशयेत् ॥
नैलवद्ग्रामसंभूतं क्रमुकं कण्ठशुद्धिकृत् ।
पाचनं मधुरं रुच्यं सरं कान्तिकरं लघु ।
त्रिदोषनाशकं चैव रसाम्लं च निगद्यते ॥

पूगवृक्षनिर्यासगुणाः—

पूगवृक्षस्य निर्यासो मोहनः शीतलो गुरुः ।
पाके चोष्णः पित्तलश्च पटुश्चाम्लः प्रकीर्त्तितः ।
वातनाशकरश्चैव मुनिभिः परिकीर्त्तितः ॥

१९ तालः ( ताड़ ) पृ० २४०

हि०-ताड़, ताल, तार । बं०-ताल । म०-ताड़, खरताल । ता०-पनै-मरम, पनम । क०-तालिमारा, बालेमर । ते०-ताति, ताडु । गु०-तड़ । द्रा०-पानम्मरं । फा०-ताल । अ०-तार । अं०-Palm Tree ( पाम ट्री ) ले०-Borassus Flabelliformis ( बोरेसस फ्लेबेलिफोर्मिस )

तालगुणाः—

तालवृक्षस्तु मधुरः शीतलो मदकृद् गुरुः ।
पुष्टिकृच्छुक्रकफकृन्मेदकृद्बलकारकः ।
वृष्यश्च सारकः पित्तदाहशोषविषश्रमान् ।
विषकुष्ठकृमीरक्तदोषवातांश्च नाशयेत् ॥ नि० र० ॥

अस्य फलगुणाः—

वातहा बृंहणो बल्यः क्रिमिहा कुष्ठनाशनः ।
रक्तपित्तहरः स्वादुस्तालः सप्तगुणान्वितः ॥ रा० नि० ॥

२.स्यामफलगुणाः—

आममस्य फलं प्रोक्तं स्निग्धं स्वादु गुरु स्मृतम् ।
मलावरोधकं बल्यं शीतलं धातुवर्धकम् ॥
वृष्यं तृप्तिकरं मांसकफोत्पत्तिकरं स्मृतम् ।
वातं श्वासं रक्तपित्तं व्रणं दाहं क्षतं तथा ।
पित्तक्षयं रक्तदोषं नाशयेदिति कीर्त्तितम् ॥

अस्थ्यार्द्रफलबीजगुणाः—

आर्द्रं तु फलबीजं च मूत्रलं शीतलं स्मृतम् ।
रसे पाके च मधुरं कफकृद्वातपित्तहृत् ॥

तालफलोद्भवजलगुणाः—

तालाम्बु पित्तजिच्छुक्रस्तन्यवृद्धिकरं गुरु । ( रा० व० ) ।

तालमण्डिकागुणाः—

श्लेष्मदोषकरी वृष्या वातला श्लेष्मवर्धिनी ।
कासहृल्लासविध्वंसकरणी तालमण्डिका ॥ आ० सं० ॥

तालप्रलम्बगुणाः—

तथा तालप्रलम्बं च रूक्षं क्षतरुजाऽपहम् ।

तालपञ्जरगुणाः—

तालवृक्षस्य शीर्षस्थः पञ्जरो धातुबर्धनः ।
वातपित्तहरश्चैव वस्तिशुद्धिकरः परः ॥

तालवृन्तवायुगुणाः—

तालवृन्तभवो वातस्त्रिदोषशमनो लघुः ॥ रा० व० ॥

तालमूलगुणाः—

तन्मूलं तु भवेत्स्वादु पाके च रक्तपित्तहम् ॥

श्रीतालनामानि—

श्रीतालो मधुतालश्च लक्ष्मीतालो मृदुच्छदः ।

श्रीतालगुणाः—

श्रीतालो मधुरोऽत्यन्तमीषच्चैव कषायकः ।
पित्तजित् कफकारी च वातमीषत्प्रकोपयेत् ॥

हिन्तालनामगुणाः—

हिन्तालः स्थूलतालश्च वल्कपत्रो बृहद्दलः ।
हिन्तालो मधुराम्लश्च कफकृत् पित्तदाहनुत् ।
श्रमतृष्णाऽपहारी च शिशिरो वातदोषनुत ॥ ( रा० नि० ) ॥

१६ बिल्वः ( बेल ) पृ० २४०

अस्य नामादिकं तु गुडूच्यादिवर्गे द्रष्टव्यं, पुनरुक्तिभिया नात्र लिखितम् ।

१७ कपित्थः ( कैथ ) पृ० २४१

हि०-कैथ, कैथा, कैंत, कइंत । बं०-कयेथ गाछ, कत्वेल, कयेत् वेल,

कयेत बेल, कयेद् गाछ । म०-कवंठ, कवट, कंवट, कविठ । गु०-कोठ, काठ, कोठु । ते०-एलांग काया, वेलगचेट्टु, एकांगा काया । यू०-कवेट । मा०-प०-कैथ । द्रा०-बलामरं । क०-बेललु, बेळडा, बलुवत, व्यालद-मर । अं०-Wood Apple ( उड् एपुल् ) ।

ले०-Feronia Elephantum ( फेरोनिया एलिफैण्टम् ) ।

अस्य बीज-बीजतैल-पुष्प-पर्णानां गुणाः—

बीजं च हृद्व्यथाऽपहम् ।
शीर्षव्यथां विषं चैव विसर्पं चैव नाशयेत् ।
बीजतैलं च तुवरं ग्राहकं स्वादु पित्तनुत् ॥
आखोर्विषं कफं चैव हिक्कां वान्तिं च नाशयेत् ।
विषनाशकरं पुष्पं पर्णं वान्त्यतिसारनुत् ।
हिक्कां नाशयतीत्येवं प्रोक्तं पूर्वमहर्षिभिः ॥ नि० र० ॥

१८ नारङ्गः ( नारंगी ) पृ० २४१

हि०-नारङ्गी, संतरा, संत्रा । बं०-कमलालेंबु, नारङ्गालेबु, नारङ्गीलेबु । म०-नारिंग । ते०-दयाकाया, गंजनिम्म, नारांजि चेट्टु । उ०-नारिंगो । ता०-किचिली । गु०-नारंगी लिंबु । फा०-किस्मे अज नारंज, नारंज । अ०-नारंज । क०- माधवला । अं०-Orange ( आरेंज ) ।

ले०-Citrus Aurantium ( सिटरस औरेण्टियम् ) ।

१९ तिन्दुकः ( तेंदू ) पृ० २४१

हि०-तेंदू, तेंदू, गाब, गाभ । बं०-गाव, तेंदू, तेद, माकडा केंद । म०-टेंभुर्णी, आयन, देम्ब रुपणी, आपन । गु०-टिंबरवो, टींबरु, टेमरू । क०-टुंबरु,रुंबुरु, रूंबरु, तुम्बर । तै०-तामिक, तुमि । ता०-तुम्बिक । फा०-अबनुसुभाड । मु०-तिम्बोरी । को०-काकटे भुर्णी, कांटेटे भुरणी । मा०-तींदू । पा०-तेदूं । अ०-अबनूस । अं०-Ebony ( एबनी )

ले०-Diospyros Embryopteris ( डायोस्पाईरोस एम्ब्रा-ओप्टेरिस )

व्यवहार—फल का रस । मात्रा—३-६ माशे ।

तिन्दुकाष्ठस्य सारस्तु पित्तरोगहरो मतः ॥ नि० र० ॥

२० कुपीलुः ( कुचिला ) पृ० २४१

हि०-कुचला, कुचिला, कोंचला । बं०-कुचिले, कूचिला । म०-काजरा, कारस्कार । गु०-झेर कोंचला (लुं) । क०-कंजिवार, हेमुष्टि, कासरकानमारा । ते०-मुष्टिगिंजा, मुसिडे, मुष्टिचेट्ट । ता०-एट्टेमारं, काकोठीं । माला०-कन्निराम । ब्रह्मी०-खाबों । फा०-इफा राकी, अझेरकी । अ०-कातिलुल् कल्क, फिल्ज़ माही, इज़राका ।

अं०-Poison Nut ( पाइज़न नट )

ले०-Strychnos Nux Vomica ( स्ट्रिक्नास नक्स वामिका )

व्यवहार—बीज (विष ) । मात्रा—शुद्ध—१-२ रत्ती ।

कारस्करो मदकरस्तुवरो ग्राहकः स्मृतः ।
कटुस्तिक्तो लघुश्चोष्णः कुष्ठरक्तविकारहा ॥
कण्डूं कफं वातरोगं व्रणं चार्शो ज्वरं जयेत् ।
अस्य चामफलं ग्राहि तुवरं वातकृल्लघु ॥
शीतलं च समुद्दिष्टं तत्पक्वं विषदं गुरु ।
पाके च मधुरं प्रोक्तं कफं वातं प्रमेहकम् ।
पित्तं रक्तविकारं च नाशयेदिति कीर्त्तितम् ॥

रसरत्नप्रदीपेऽस्य शुद्धिर्यथा—

त्रिदिनं काञ्जिके क्षिप्तः शुद्धः स्याद्विषतिन्दुकः ।
किञ्चिदाज्येन भृष्टो वा ॥

२१ मर्कटतिन्दुकः ( मकर तेंदुआ ) पृ० २४१

हि०-मकर केंद, मकर तेंद, मकर तेंदु, मकर तेंदुआ, केंदु, तेंदु, आबनूस । बं०-तेंद, केद, माकड़ागाव, माकड़ातेंदु, आबनूस । म०-कांकटें भुर्णी । गु०-काक टिंवरवो । तै०-तुमि, तुमकी । ता०-तुम्वि । प्रा०-काकतेंदु ।

ले०-Diospyros Melanoxylon (डायोस्पाईरोस मीलेनोक्सीलन)

काकतिन्दुः कषायाम्लो गुरुर्वातविकारनुत् ।
पक्वस्तु मधुरः किंचित् कफकृत् पित्तवातहृत् ॥

२२ राजजम्बू ( बड़ी जामुन ) पृ० २४२

हि०-बड़ी जामुन, फरेन्द्र ( न ), फड़ेना, फलेन्द्रा, राज जामुन। बं०-वड़जाम। म०-रायजाम्भूल, थैार जाम्बुल। गु०-जाम्बुन, राजजाम्बु। क०-दोड्डुनिरलु, दोदुनिरली(लु)। ते०-पेद्दनेरडि, नेरडुचेट्टु। को०-राजिले।

अं०-Jambul Tree ( जाम्बुल ट्री )

ले०-Eugenia Jambolana ( युजिनिया जाम्बोलाना )

,, Syzyzyum Jambolanum ( सिझिझियम जाम्बोलेनम् )

महाजम्ब्वा नामानि गुणाश्च—

महाजम्बू राजजम्बूः स्वर्णमाता महाफला।
शुकप्रिया कोकिलेष्टा महानीला बृहत्फला॥
राजजम्बूस्तु मधुरा चोष्णा च तुवरा मता।
स्वर्या मलस्तम्भकरी श्वासशोषश्रमापहा॥
मुखजाड्यातिसारघ्नी कफकासविनाशिनी।
फलं चास्यास्तु रुचिदं मधुरं स्तम्भकं गुरु॥
दोषनाशकरं स्वादु ऋषिभिः परिकीर्त्तितम्॥

व्यवहार—छाल। मात्रा—१-२ तोले।

जम्ब्वा नामानि गुणाश्च—

जम्बूस्तु सुरभिपत्रा नीलफला श्यामला महास्कन्धा।
राजार्हा राजफला शुकप्रिया मेघमोदिनी च नवाह्वा॥
जम्बूवृक्षस्तु तुवरो ग्राही मधुरपाचकः।
मलस्तम्भकरो रूक्षो रुचिकृत् पित्तदाहहा॥
अम्लः कण्ठ्यः कृमिश्वासशोषातीसारकासहा।
रक्तदोषं कफं चैव व्रणं चैव विनाशयेत्॥
फलं च तुवरं चाम्लं मधुरं शीतलं मतम्।
रुच्यं रूक्षं ग्राहकं च लेखनं कण्ठदूषकम्॥
मलस्तम्भकरं वातकारकं कफपित्तनुत्।
आध्मानकारकं प्रोक्तं पूर्ववैद्यैर्मनीषिभिः॥

जम्बूमज्जाऽङ्कुरयोर्गुणाः—

तन्मज्जा मधुरा ग्राही विशेषान्मधुमेहहा।

तदङ्कुरा हिमा रूक्षा ग्राहकाध्मानकारकाः ॥

२३ क्षुद्रजम्बूः ( छोटी जामुन ) पृ० २४२

हि०-छोटीजामुन, कठजामुन, बनजामुन । बं०-क्षुद्रेजाम, बनजाम । गु०-क्षुद्रजम्बु, डुंगरी जांबु ।

ले०-Premna Herbacea ( प्रेमना हरबेसिया ) ।

क्षुद्रजम्ब्वादीनां नामानि—

क्षुद्रजम्बूर्दीर्घपत्रा सूक्ष्मकृष्णफला तथा ।
काकजम्बूः काकफला नादेयी काकवल्लभा ।
भृङ्गेष्टा काकनीला च ध्वाङ्क्षजम्बूर्घनप्रिया ॥
अन्या च भूमिजम्बूर्ह्रस्वफला भृङ्गवल्लभा ह्रस्वा ।
भूजम्बूर्भ्रमरेष्टा पिकभक्षा काष्ठजम्बूश्च ॥

क्षुद्रजम्बूगुणाः—

क्षुद्रजम्बूस्तु तुवरा हृद्या च मधुरा मता ।
वीर्यप्रदा ग्राहिणी च पुष्टिकृत् कफपित्तहा ॥
हृद्रोगं कण्ठरोगं च दाहं चैव विनाशयेत् ।
अस्याः फलगुणाः प्रोक्ता राजजम्बूफलैः समाः ॥ ( नि० र० )

जलजम्बूगुणाः—

जलजम्बूस्तु तुवरा शीता तिक्ता गुरुः स्मृता ।
पाके च मधुरा चाम्ला पुष्टिकृद् ग्राहिणी मता ॥
वीर्यवृद्धिकरी बल्या श्रमदाहातिसारहा ।
रक्तदोषं कफं पित्तं व्रणं चैव विनाशयेत् ॥

२४ बदरी ( बेर ) पृ० २४२

हि०-बैर, बेर, बइर, बेरी, बयर । बं०-कुल, बसर । म०-बोर, बोरीचे झाड़ । गु०-बोरड़ी । क०-बोरे, यरनु, यचले । ता०-रेयन्ती । ते०-रेगुचेट्टु, रेंघ गोट्टे चेट्टु । उ०-कुड़ि । मु०-बोर । मा०-बोरडी बोर । पं०-बेर । द्रा०-यलंदै । फा०-कुनार, सिदुर । अ०-सिद्रनबंक ।

अं०-Plum ( प्लम ) ।

ले०-*Zizy Phus Jujuba* ( जिजि फस जुजुबा )

अपक्वं श्लेष्माणं विरचयति वातं वितनुते-
ततो मध्यावस्थं किमपि मधुराम्लं पवनहृत् ।
सुपक्वं पित्तघ्नं श्रममदवमिच्छेदि बलदं-
सरं तृष्णाजित्तद् गृहबदरमश्नन्ति धनिनः ॥
बदरी शीतला रूक्षा तिक्ता पित्तकफापहा ।
फलमस्यास्तु मधुरं तुवरं चाम्लमीरितम् ॥
तच्च पक्वं तु मधुरमम्लमुष्णं कफप्रदम् ।
ग्राहकं लघु रुच्यं च वाय्वतीसारशोषहृत् ।
रक्तश्रमहरं प्रोक्तं पण्डितैश्चरकादिभिः ॥ नि० र० ॥

**गजकोलगुणाः—**

गजकोलं दुर्जरं स्याच्छीतं स्वादु गुरु स्मृतम् ।
ग्राहकं लेखनं स्निग्धं पौष्टिकं मलबद्धकृत् ॥
आध्मानकारकं चैव पित्तवातविनाशनम् ॥ ( रा० नि० )

**राजबदरगुणाः—**

राजबदरः सुमधुरः शिशिरो दाहार्त्तिपित्तवातहरः ।
वृष्यश्च वीर्यवृद्धिं कुरुते शोषश्रमं हरते ॥

**भूबदरी ( झरबेर ) गुणाः—**

भूबदरी मधुराऽम्ला कफवातविकारहारिणी पथ्या ।
दीपनपाचनकर्त्री किञ्चित् पित्तास्रकारिणी रुच्या ॥ ( नि०र० )
इसका लेटिन नाम—( ज़िज़िफ़स न्युम्मुलेरिया )

**बदरीफलमज्जगुणाः—**

बदरीफलमज्जा तु तुवरा मधुरा मता ।
शुक्रदा बलदा वृष्या कासश्वासतृषाऽपहा ॥
वातघ्नी छर्दिदाहघ्नी पित्तहा मुनिभिर्मता ॥ नि० र० ॥

**बदरीपत्रत्वग्बीजगुणाः—**

बदरस्य पत्रलेपो ज्वरदाहविनाशनः ।
त्वचा विस्फोटशमनी बीजं नेत्रामयापहम् ॥ रा० नि० ॥

## २९ प्राचीनामलकम् ( पानी आमला ) पृ० २४२

हि०-पानी आमला, पानी आंवड़ा (रा), पनियाला । ब०-पानि अम्ब-

रा, पानि आमला । म०-पान आंवले, पाण आवला ( ली ) । गु०-पाणि-आंवले, पांण आवला । ते०-प्राचीनामलकमु । ता०-ताळीसपत्री ।

ले०-Flacourtia Cataphracta (फ्लाकोर्सिया काटाफ्राक्टा) ।

पर्णामलकं मधुरं रुचिप्रदं गुरु तथैवोष्णम् ।
विषत्रिदोषशमनं कफतृष्णावातहं प्रोक्तम् ।
सुतरां तदेव पक्वं कफपित्तकरं विशेषतश्चोक्तम् ।। ( नि० र० )

२६ लवली ( हरफारेवड़ी ) पृ० २४३

हि०-हरफारेवड़ी ( री ), लवली, हरफरौरी । बं०-नोयाल, नोयाड, लेयोयार, लोयाड़ । म०-राय आंवला, हरपररेवड़ी, काथ आवला । गु०-हरफारेवड़ी, खाटो, खाटो आवली । पं०-हरपा रेवड़ी ।

ले०-Phyllanthus Distichus ( फिलान्थस डिस्टिकस ) ।

२७ करमर्दः ( करोंदा ) पृ० २४३

हि०-करोंदा, करवँदा, करौंदा, करोना । बं०-करमचा, करमिया । म०-करवंद । गु०-करमदा, करमर्दू । क०-करिजिगे । ते०—वाका, करवंदे । मु०-करिन्दा । मा०-करवंदा ।

ले०-Carissa Corandas ( केरिसा कोरंडास ) ।

अं०-Jasmine Flowered Carisa ( जास्मिन् फ्लावर्ड केरिसा )

करमर्दफलं चामं तिक्तं चाग्निप्रदीपकम् ।
गुरु पित्तकरं ग्राहि चाम्लमुष्णं रुचिप्रदम् ।।
रक्तपित्तं कफं चैव बर्धयेत्तद्विनाशकम् ।
तत्पक्वं मधुरं रुच्यं लघु शीतं च पित्तहम् ।।
रक्तपित्तं त्रिदोषं च विषं वातं च नाशयेत् ।
तच्छुष्कं पक्वसदृशं गुणैर्ज्ञेयं विचक्षणैः ।।
अत्यम्लस्य गुणाश्चैव ज्ञेया आमकराम्लवत् ।

अस्य मूलगुणाः—

तन्मूलं कृमिनुत सरम् ।। शो० नि० ।।

२८ करमर्दिका ( करोंदी ) पृ० २४३

हि०-करोंदी, करौंदी, करवँदी । ब०-करमची । म०-करवन्दी । गु०-करमदो । ते०-पारिकचेट्टु ।

२९ प्रियालः ( चिरौंजी ) पृ० २४३

हि०-चिरोंजी, चिरौंजी, चिरवँजी। बं०-चिरौंजी, पियाल, पियाशाल। म०-चारोली, चार। गु०-चारोली। क०-चारनीज,, चारबीज, मेरप्पि, मेरवे। ते०-सारुपपु, चारपप्पु। ता०-काट्टु मांगोट्टै, काटमरा। को०-चारवृक्ष बीज। उ०-चरु, चिरोली। फा०-नुकलं खाजा, नुकुल ख्वाजह। अ०-हब्बुस्समाना, हब्बुल समनह।

ले०-Buchanania Latifolia ( बुचनानिया लेटिफोलिया )

अस्य मूलतैलयोर्गुणाः—

चारमूलं तु तुवरं रक्तरुक्कफपित्तहम्॥ ( नि० र० )

तत्तैलं मधुरं गुरु।

किञ्चिदुष्णं कफकरं पित्तवातविनाशनम् ( नि० र० )

३० राजादनः ( खिरनी ) पृ० २४३

हि०-खिरनी, खिर्नी, खिन्नी। बं०-क्षीर खेजूर, क्षीरणी, रांजनी, काशेरनी। म०-खिरनी, रांजनी, रायणी, रेवणे। गु०-रायण, रायणी। क०-खिरणीं मारा, खने मारिले, हालेमर। ता०-पल्ल। मु०-केर्णि। ते०-पालमानु। ले०-Mimusops Hexadra ( माइमुसोप्स हेक्सेंड्रा )। अं०-Obtuse Leaved Mimusops (ओब्टयूस लीव्ड माइमुसोप्स)

३१ विकङ्कतः ( कंटाई ) पृ० २४४

हि०-कंटाई, किंकिणी, विकंकत, बंज, रामबबूर। बं०-बइंचिगाछ, बैंची, बोंच फल। म०-वेहकल, गुलघोंटी, पिंड रोहिणी। गु०-विकलो, बेहफल। क०-हलुमाणिका मालेगु, हल सानिका। ते०-कानवेगु चेट्टु। उ०-बइच कुड़ि। प०-कुकोया। द्रा०-बल्ल बेलम।

ले०-Flacourtia Ramontchi ( फ्लेकोर्शिया रामोंची )

विकङ्कतोऽम्लमधुरः पाकेऽतिमधुरो लघुः।

दीपनः कामलाऽस्रघ्नः पाचनः पित्तनाशनः॥ ( रा० नि० )

३२ पद्माक्षम् ( कमल गट्टा ) पृ० २४४

हि०-कमल गट्टा, कमलके बीज। बं०-पद्मवीचि। म०-कमलाक्ष, कमलाचें बीज। गु०-कमल काकड़ी। क०-तावडे बीज, पद्माक्ष। ते०-तामरकारा, तामरकाई। यू०-गुलहार। अ०-बालके कुवति।

### ३३ मखान्नम् ( मखाना ) पृ० २४४

हि०-मखाना, मखान्ना। बं०-माखाना, माख्ना, पानफल। गु०-मखाना ( णा )। म०-मखाणे, मकाणे। दे०-गिलागिच। प०-मा०-फूलमखाना। उ०-कन्नपद्म।

ले०-Euryale Ferox ( युर्यलि फेराक्स )

व्यवहार—भुने बीज। मात्रा—६ माशे से १ तोला।

### ३४ शृङ्गाटकम् ( सिंघाड़ा ) पृ० २४४

हि०-सिंघाड़ा ( रा ), सिंहाड़ा ( रा )। बं०-पानीफल, सिंगाड़े, पाणिफल। म०-सिंगाड़े। गु०-सिंगोडा। क०-सिंगाडे। ते०-परिकिगड्डु, दुम्पगड्डु। फा०-सुरंजान।

ले०-Trapa Bispinosa ( ट्रापा बिसपाइनोसा )

शृङ्गाटकः शोणितपित्तहारी लघुः खरो वृष्यतमो विशेषात्।
त्रिदोषतापश्रमशोफहारी रुचिप्रदो मेहनदार्ढ्यहेतुः ॥ रा० नि० ॥

### ३५ कैरविणीफलम् ( बेरी ) पृ० २४४

हि०-बेरी, कुमुदके बीज, कुमुद बीज, बेरा, घंघोल के दाने, भटबेरा, भेटबेरा। बं०-हेलाबीज, सुन्दीबीज। गु०-पोयणाना बीज। फा०-तुख्म नीलोफर। अ०-करन बुल् माय।

### ३६ मधूकः ( महुआ ) पृ० २४४

हि०- महुआ, महुया, महुवा। बं०-मौल, मउल, मोल, मोया। म०-मोहाचा वृक्ष, मोहवृक्ष, मोहोवृक्ष। गु०-महुडो, महुडा। क०-इप्पेमारा, महुइप्पे, दिप्पेमर। ते०-इपा, पिन्ना, इप्प। ता०-कट इल्लुपि, कठइल्लुपि, इलुप्पै। मु०-मोहा। प०-महुआ। मा०-महुवो। द्रा०-इलुप्पं। फा०-चकां, सफजंल, आबीविही, गुलचकां। अं०-Elloopa Tree ( इलूपा ट्री )

ले०-Bassia Latifolia ( बेसिया लाटिफोलिया )

मधूको मधुरः शीतः श्लेष्मलो वीर्यदः स्मृतः।
पुष्टिकृत्तुवरस्तिक्तः पित्तदाहव्रणश्रमान् ॥
कृमिदोषं च वातं च नाशयेदिति कीर्त्तितम् ॥

अस्य पक्वफलगुणाः—

तदेव पक्वं बलदं पित्तवातविनाशनम् ॥ नि० र० ॥

अस्य त्वक्तैलसाराणां गुणाः—

मधूकं रक्तपित्तघ्नं व्रणशोधनरोपणम् ।
मधूकतैलं मधुरं पिच्छिलं तुवरं मतम् ॥
कफपित्तज्वरं चैव दाहपित्तं च नाशयेत् ।
मधूकसारो नस्येन भूतादिकफवातजित् ॥

३७ जलमधूकः ( जल महुआ ) पृ० २४४

हि०-जल महुआ । म०-जलमोहा । ते०-पिन्ना । क०-जलमह्वे । बं०-जलमउल । क०-तोरेइप्पे । गु०-जलमहुडो ।

ले०-Bassia Longifolia ( बेसिया लांगीफोलिया )

अस्यतद्भेदस्य च नामानि गुणाश्च—

मधूकोऽन्यो द्वितीयस्तु जलजो दीर्घपत्रकः ।
ह्रस्वपुष्पफलः स्वादुर्गौलिका स्यान्मधूलिका ॥
ज्ञेयो जलमधूकस्तु मधुरो व्रणनाशनः ।
वृष्यो वान्तिहरः शीतो बलकारी रसायनः ॥

३८ परूषकम् ( फालसा ) पृ० २४९

हि०-फालसा, परुषा, पेरुसा, फरुसा, फल्हुई । बं०-परुष, फलसा । म०-पर्पका, फालसा । क०-बेट्टहा, दागल, दोगली । ते०-पुटिकी, चिट्टिदु । गु०-धामण । मा०-फालस्या । फा०-पालसा, पालसह । अ०-फालसह ।

ले०-Greevia Asiatica ( ग्रीविया एसियाटिका )

अस्य त्वग्गुणाः—

परूषत्वक्प्रमेहघ्नी योनिमेढ्रप्रदाहनुत् ।
मूत्रदोषप्रशमनी शीतपित्तानिलापहा ॥ आ० सं० ॥

३९ तूत पृ० २४९

हि०-सहतूत, तूत, तूंत, शाहतूत, ततरी, साहुड़ । बं०-तूँत, टूँद, पलाशपिपुल । म०-तूंते, सेंतूत, पारसापिंपल, पारिस पिंपलु । गु०-शेतूत । ते०-कम्बलिचेट्टु । ता०-मुसुक वइ चेडि । फा०-शाहतूत, तूत तूर्श । अ०-तूत, तूदहामीज । क०-बंगरलि । को०-तूतीची फले ।

अं०-Mul Berries ( मल बेरिज् ) ।
ले०-Morus Inbica ( मोरस इण्डिका ) ।
,,-Morus Nigra ( मोरस निग्रा ) ।
,,-Morus Alba ( मोरस एलबा ) ।

फलों के आकार भेद से तूत ३ प्रकार का होता है । जिसके फल—लम्बाई युक्त गोल और पकनेपर काले होते हैं उसे ( मोरस इण्डिका ), लालरङ्ग के फल वाले को ( मोरस एलबा ), और हरापन युक्त सफेद-रङ्ग के लम्बे फल वालेको ( मोरस निग्रा ) कहते हैं ।

४० दाड़िम ( अनार ) पृ० २४९

हि०-अनार, दाड़िम, धालिम । बं०-दाड़िम, डालिम गाछ । म०-डालिंब, दालिंब । गु०-दालिम, दादमनु झाड़ । क०-दालिंबा, दालिंब । ते०-डानिम्म चेट्टु, दालिंबकाया । ता०-मादलै, मडलै, मडलम, मुगिलम । मा०- दाड़म । द्रा०-मादल । अं०-Pomegranate ( पोमेग्रेनेट )
ले०-Punica Granatum ( प्युनिका ग्रानेटम )

व्यवहार—दाना, छिल्का । मात्रा—६ माशे से १॥ तोला ।

बल्यं पित्तानिलघ्नं लघु शिशिरमसृग्दाहमूर्च्छापिपासा-
भ्रान्तिश्रान्तिज्वरच्छर्द्यरुचिमदगदाजीर्णदौर्बल्यनाशी ।
मिष्टं विष्टम्भि शुक्रप्रदमकफकरं दडिमं चातिपक्वं-
हीनं तस्मादपक्वं तुवरमथ मरुन्माथि रुच्यं यदम्लम् ॥

अनारदाना के।गुण—

शुष्कं बालं च तत्प्रोक्तं रुच्यं च हृदयप्रियम् ।
वातानुलोमनकरं मुनिभिः परिकीर्त्तितम् ॥

दाडिमपुष्पादगुणाः—

तत्पुष्पं च पुनर्ज्ञेयं नासासृगतिनावनात् ।
दाडिमत्वक् क्रिमिघ्नी च ग्राही रक्तातिसारहा ॥ शो० नि० ॥

४१ बहुवारः ( लिसोड़ा ) पृ० २४९

हि०-लिसोड़ा, निसोरा, बहुवार, लभेड़ा, लसफसिया । बं०-बहुयार, चालतागाछ, बोहरी । म०-भोंकर, शेलवंट, शेलवट । गु०-गुंदी, गुंदो मोटो । क०-चेल्लु गोंदिगी, दोड चल्लु, चल्ले कायि । ते०-नाक्केरु,

नुकंकेरु, पेद्दाना क्केरु, चेन्न नक्कर। ता०-विडि। उ०-अड़, अउ। द्रा०-नरि बिली। फा०-सपिस्तां, सिपिस्तां। अ०-सपिस्तां दबक। मु०-भोंकर। मा०-लेसवो। अं०-Sebesten ( सेबेस्टेन )

ले०-Cordia Myxa ( कोर्डिया मिक्सा )

व्यवहार—फल। मात्रा—१५-२० दाने।

भूकर्बुदारकस्य नामानि गुणाश्च—

भूकर्बुदारकश्चान्यो लघुः श्लेष्मातकस्तथा।
क्षुद्रश्लेष्मातकं वातकोपनं मधुरं मतम्।
किंचिच्च शीतलं ज्ञेयं कृमिघ्नं स्वर्णमारकम्॥

छोटे बड़े फलों के भेद से "लिसोरा" ३ प्रकार का होता है, बड़े फल-वाले "लिसोड़ा" को ( श्लेष्मातक ), मध्यमफलवाले को "भूकर्बुदार" लेटिनमें Cordia Obliqua ( कोर्डिया ओबलिका ) तथा छोटे फल-वालेको "गोंदी" या "गोदनी" और लेटिन में-"कोर्डिया रोथाइ" कहते हैं।

४२ कतकः ( निर्मली ) पृ० २४६

हि०-निर्मली, पायपसारी। बं०-निर्मल फल। म०-निवळी, निर्मली, चिल्हार। गु०-निर्मली। क०-चिल्लिकायि। द०-चिलबिंज। ता०-तेत-रन कोट्टई। ते०-चिलगिन जालु। क०-चिलिगिड्ड। मा०-निर्मली, निबली।

ले०-Strychnos Potatorum ( स्ट्रिकनोस पोटेटोरम )।

अं०-Nut Which Clears Water ( नट् ह्विच क्लिअर्स वाटर )

व्यवहार—बीज। मात्रा—३—६ माशे।

कतकः कटुकस्तिक्तो लेखनो रुचिकृल्लघुः।
चक्षुष्यस्तुवरः शीतो विशदश्च विकासकः॥
छेदनो मधुरश्चैव तृषादाहविषापहः।
गुल्मशूलकृमीन्मेहं नेत्ररुग्जलजं मलम्॥
नाशयेदिति च प्रोक्तः फलं तस्य च कोमलम्।
चक्षुष्यं वातकृच्छीतं रक्तपित्तं तृषां विषम्॥
मोहं च नाशयत्येव तरुणं तत्तु दुर्जरम्।
रुचिदं कफपित्तघ्नं तत्पक्वं पित्तलं मतम्॥

छर्देः स्वेदस्य जनकं शोफं पाण्डुं विषं जयेत् ।
प्रतिश्यायं कामलां च नाशयेदिति कीर्त्तितम् ॥
कतकस्य च बीजं तु चक्षुष्यं तुवरं गुरु ।
जलप्रसादनं शीतं मधुरं चाश्मरीहरम् ॥
वातं कफं मूत्रकृच्छ्रं तृषां नेत्ररुजं विषम् ।
प्रमेहं शीर्षरोगं च नाशयेदिति कीर्त्तितम् ।
कतकस्य च मूलं तु सर्वकुष्ठहरं परम् ॥

४३ द्राक्षा ( दाख ) पृ० २४६

हि०-दाख, मुनक्का, मोनक्का, किसमिस, अंगूर, कालीदाख, भूरीदाख। बं०-बेदाना, मनेक्का, किसमिस, आङ्गुर। म०-बेदाणा, किसमिस, काळाद्राक्षें। गु०-धराख, द्राक्ष, किसमिस, कालोधराख। क०-बेडगण द्राक्षे, चिकुद्राक्षे। ता०-कोडिमंडी, कोडिमुंदिरी। ते०-द्राक्षा पण्डु, द्राक्षचेट्टु, किसमिस। फा०-अंगूर, मुनक्का, दानेमबीज। अ०-हबुस् सजीव, किसमिस, एनब्जबीव। अं०-Grapes ( ग्रेप्स ), Raisins ( राइसिन्स )।
ले०-Vitis Vinifera ( विटिस विनिफेरा )।

व्यवहार—फल। मात्रा—१०-१९ दाने।

द्राक्षानामानि—

द्राक्षा मधुरसा स्वाद्वी कृष्णा चारुफला रसा ।
मृद्वीका गोस्तनी चैव यक्ष्मघ्नी तापसप्रिया ॥

कपिलद्राक्षानामानि—

अन्या कपिलद्राक्षा मृद्वीका गोस्तनी च कपिलफला ।
अमृतरसा दीर्घफला मधुवल्ली मधुफला मधूलिश्च ॥
हरिता च हारहूरा सुफला मृद्वी हिमोत्तरा पथिका ।
हैमवती शतवीर्या काश्मीरी गजराजमहिगणिता ॥

काकलीद्राक्षानामानि—

अन्या सा काकली द्राक्षा जाम्बुका च फलोत्तमा ।
लघुद्राक्षा च निर्बीजा सुवृत्ता रुचिकारिणी ॥
द्राक्षाबालफलं कटूष्णविशदं पित्तास्रदोषप्रदं-
मध्यं चाम्लरसं रसान्तरगतं रुच्यातिवह्निप्रदम् ।

पक्वं चेन्मधुरं तथाऽम्लसहितं तृष्णाऽस्रपित्तापहं-
पक्वं शुष्कसमं श्रमार्त्तिशमनं सन्तर्पणं पुष्टिदम् ॥

४४ खर्जूरी ( खजूर ) पृ० २४६

हि०-खजूर, देशीखजूर, खिजूर । बं०-खेजूर गाछ । म०-शिन्दी, लघुशिंदी, शिंधी । क०-इचुली, इंचुलु, करि इंचुली । ते०-इंटाचेट्टु, खजूर पंडु । गु०-खजूरी । फा०-तमर रुतव, खुरमाय हिन्दी । अ०-खुरमातर, रतब हिन्दी । अं०-Wild Date ( वाइल्ड डेट )

ले०-Foenix Sylvestris ( फोनिक्स सिल्वेस्टरिज )

„-Foenix Montena ( फोनिक्स मोण्टेना )

व्यवहार—फल । मात्रा—१-२ तोले ।

अपक्वखर्जूरफलं त्रिदोषाणां प्रकोपणम् ।
पक्वमेव हितं श्रेष्ठं त्रिदोषशमनं परम् ॥ आ० सं० ॥

खर्जूरादिमस्तकगुणाः—

गुवाकतालखर्जूरनारिकेलशिरांसि च ।
स्वादुतिक्तकषायाणि मूत्रातङ्कहराणि च ॥
बलप्राणकराण्याहुः शुक्रवृद्धिकराणि च ॥ रा० व० ॥

४५ पिण्डखर्जूरी ( पिण्ड खजूर ) पृ० २४६

हि०-पिण्डखजूर, पिनखजूर । बं०-पिण्डखेजूर । गु०-खजूर । क०-सिंह इंचिल । पं०-पिण्डखजूर ।

ले०-Phoenix Dactylifera ( फोनिक्स डाक्टलिफेरा )

दाहघ्नी मधुराऽस्रपित्तशमनी तृष्णाऽऽर्त्तिदोषापहा-
शीतश्वासकफश्रमोदयहरा सन्तर्पणी पुष्टिदा ।
वह्नेर्मान्द्यकरी गुरुर्विषहरा हृद्या च धत्ते बलं-
स्निग्धा वीर्यविवर्धिनी च कथिता पिण्डाख्यखर्जूरिका ॥

४६ छुहारा पृ० २४६

हि०-छहारा, छोहारा । बं०-सोहारा । म०-शिंदी खजुरी । गु०-खारक । क०-इचुलु, करिइंचुली, करिइंचुलु । ते०-खजूरपुपंडु । फा०-खुर्मी, खुर्मीखुश्क । अ०-तमर । अं०-Date Palm ( डेट पाम )

ले०-Phoenix Dactylifera ( फोनिक्स डाक्टलिफेरा )

व्यवहार—फल । मात्रा—१-२ तोले ।

४७ पिण्डखर्जूरीभेदः-सुलेमानी खर्जूरी ( सुलेमानी खजूर ) पृ० २४७

सुलेमानी खजूर-पिण्डखजूर का भेद है इसे गुजराती में-'सुलेमानी' और 'मुसी खारेक' तथा मरहठी में 'खारेक' कहते हैं ।

४८ वातादः ( बदाम ) पृ० २४७

हि०-बादाम, बदाम । बं०-बादाम । म०-बदाम, गोडेबादाम, कडवे बादाम । गु०-बदाम । तै०-बेदम, बेदमा । ता०-नट वडुम । फा०-बदाम, बदामशीरी, बादामतल्खा । अ०-लोजल, लौज, लौजलहलु, लोजलमुर ।

अं०-Sweet Almond ( स्वीट आलमण्ड )

"—Bitter Almond ( बीटर आलमण्ड )

ले०-Prunus Amygdalus ( प्रनस् एमिगडेलस् )

व्यवहार—तैल । मात्रा—३-६ माशे ।

वातादः सारकश्चोष्णो गुरुरम्लः कफप्रदः ।
स्निग्धः स्वादुश्च तुवरः शुक्रलो वातनाशनः ॥
उष्णवीर्य चाम्रफलं सारकं गुरु पित्तलम् ।
कफपित्तकरं चैव वातनाशकमुत्तमम् ॥
तत्पक्कं मधुरं वृष्यं सुस्निग्धं पौष्टिकं मतम् ।
शुक्रलं कफकृच्चैव रक्तपित्तं व्यपोहति ॥
शामकं वातपित्तस्य पूर्ववैद्यैरुदीरितम् ।
शुष्कं च तत्फलं प्रोक्तं मधुरं धातुबर्धकम् ॥
स्निग्धं वृष्यं च बल्यं च पौष्टिकं कफकारि च ।
वातपित्तस्य शमनं प्रोक्तं गुणविशारदैः ॥ नि० र० ॥

वातादतैलगुणाः—

वातादतैलं मृदु रेचनं स्याद्वाजीकरं मूढगदं प्रहण्यात् ।
पित्तानिलघ्नं लघु दाहनाशि लावण्यदं मेहकरं सुशीतम् ॥ (आ०सं०)

४९ सेवम् ( सेव ) पृ० २४७

हि०-सेब, सेव । बं०-सेऊ, सेउफल । म०-मोठेंबोर सेवफल । गु०-सेवफल । क०-सेव । फा०-सेव । अ०-तुफाह, तुफ्फाह । मा०-सेव ।

पं०-सेव । अं०-Apple ( एप्पिल )

ले०-Pyrus Marus ( पाइरस मेरस )

६० अमृतफलम् ( नासपाती ) पृ० २४८

सेब, बीह, नासपाती इन तीनों की एकही जाति है । इनमें अन्तर थोड़ा सा रहता है, जैसा कि-छुहारा, पिण्डखजूर और खजूर एक ही जाति के हैं और उनमें अन्तर रहता है ।

६१ पीलुर्बृहत्पीलुश्च ( पीलू , बड़ा पीलू ) पृ० २४८

हि०-पीलु, पील्लू, झल, बड़ा पील्लू । बं०-पीलुगाछ । म०-ऌघुपीलु, थोरपिलु, किकचेल्रावृक्ष । गु०-पीलु, जाल्य, खारीजाल्य, मोटीजाल्य । क०-मिरीये ऊगनि, गेनुमर, दोड्डुपीलु । तै०-गोलगुचेट्टु, पिन्नवरगोंड, वरगोगुं । ता०-कोकु, कोकू । फा०-दरखते मिस्वाक् । अ०-ईराक, अराक । पं०-पीलु । मा०-जाल ।

अं०-Mustard Tree of Scriptur ( मस्टर्ड-ट्री-ऑफ् स्क्रिप्चर )

ले०-Salbadora Persica ( सालबेडोरा पर्सिका )

बड़ा पीलू का लैटिन नाम—

,,-Salbadora Oleoides ( सालबेडोरा ओलिओइडिस )

बृहत्पीलुनामगुणाः—

अन्यश्चैव बृहत्पीलुर्महापीलुर्महाफलः ।
राजपीलुर्महावृक्षो मधुपीलुः षडाह्वयः ॥
बृहत्पीलुस्तु मधुरो वृष्यः पित्तविषापहः ।
आमहा दीपनो रुच्यस्तैलं चास्य लघु स्मृतम् ॥
कफवातरुजं हन्ति चेति पूर्वबुधैः स्मृतम् ॥ नि० र० ॥

६२ अक्षोटः ( अखरोट ) पृ० २४८

हि०-अखरोट, अक्षोट, पहाड़ी पीलु । बं०-आखरोट, आकरोट, आक्रोट । पं०-अखरोट । म०-अक्रोड, अकरोड, अक्रोड । गु०-अकरोड, अखोड । तै०-अक्षोलमु, कोंडगोगुनु । द्रा०-अक्रोटु । क०-आखोट, वेट्टद गोनुमर । फा०-चारजिर्दगां, चार्तगज । अ०-जोजेहिन्दी, जोजुलहिन्द, जोज़, जोझ अक्रपम् मगज । अं०-Walnut ( वाल्नट् ) और

Belgaum Walnut ( बेलगाम वालूनट )

लै०-Juglans Regia ( जगलांस रेजीया )

व्यवहार—फल की गूदी । मात्रा—१-२ तोले ।

अखरोट दो प्रकार का होता है—१ कागजी अखरोट-इसका छिलका पतला होता है, २ मोटे छिलके वाला अखरोट-यह आप ही आप उत्पन्न होता है, पहला बोया जाता है ।

अक्षोटो मधुरः किञ्चिदम्लः स्निग्धश्च शीतलः ।
वीर्यवृद्धिकरश्चोष्णो रुचिदः कफपित्तकृत् ॥
गुरुः प्रियो बलकरः कफकृन्मलबद्धकृत् ।
वातपित्तं क्षयं वातं हृद्रोगं रक्तदोषकम् ।
रक्तवातं च दाहं च नाशयेदिति कीर्त्तितम् ॥ नि० र० ॥

९३ बीजपूरः ( बिजोरा ) पृ० २४८

हि०-बिजोरानींबु, बिजवरानीमो, बिजौरानेबू । बं०-टावालेबु । म०-महालुंग, माहुलिंग । गु०-बिजोरूंलिंबु । क०-माधवल, माधवला, महाफल, माधला । तै०-दाबाकाया, मादिफलमु, मोधोफलपु चेट्टु । उ०-कलंबा । फा०-तुरंज, तरंज । अ०-उत्तरंज, उतरज । प्रा०-महूर ।

अं०-Citrus Acida ( सिट्रस ऐसिडा )

मातुलुङ्गफलं चाम्लमुष्णं कण्ठविशोधकम् ।
तीक्ष्णं लघु प्रियं चाग्निदीपकं रुचिकारकम् ॥
स्वादु जिह्वाहृदययोः शोधकं पित्तवातनुत् ।
कफश्वासतृषाकासान् हिक्कां चैव विनाशयेत् ॥
अरुचिं रक्तपित्तं च नाशयेदिति कीर्त्तितम् ।
तच्च बालं मातुलुङ्गं पित्तवातकफप्रदम् ॥
रक्तरुक्कारकं चैते मध्यमस्यापि ते गुणाः ।
पक्वं महावर्णकरं हृद्यं बल्यं च पौष्टिकम् ॥
शूलाजीर्णविबन्धघ्नं वातं श्वासं कफं जयेत् ।
अग्निमान्द्यं च शोफं च कासारोचकनाशकम् ॥
फलत्वग् दुर्जरा तिक्ता तीक्ष्णोष्णा स्निग्धिका गुरुः ।

क्रिमिवातकफान् हन्ति त्वग्द्रवः साधु शीतलम् ॥
गुरुर्धातोर्वृद्धिकरः स्निग्धः कफकरः स्मृतः।
वातपित्तहरः प्रोक्तः प्रोक्तोऽन्तर्भागको मधुः॥
वातं शूलं कफं छर्दिमरोचस्य च नाशकः।
केसरं दीपनं मेध्यं लघु ग्राहि रुचिप्रदम् ॥
गुल्मोदरश्वासकासहिक्कावातमदात्ययान्।
मदशोषविबन्धार्शोवातांश्च नाशयत्यलम् ॥
केसरस्य रसः पार्श्ववस्तिशूलकफारुचीः।
वातं च श्वासकासं च छर्दिं चैव विनाशयेत् ॥
बीजं तु मातुलुङ्गस्य गर्भदं दुर्जरं गुरु।
उष्णं तिक्तं दीपनं च बल्यमर्शोरुजाऽपहम् ॥
वातपित्तशोफकफान्नाशयेदिति कीर्त्तितम्।
फलमज्जा गुरुः शीता स्वाद्वी स्निग्धा बलप्रदा ॥
वातपित्ते नाशयेच्च मूलमर्शःक्रिमीहरम्।
विषूचीं मलबन्धं च शूलं चैव विनाशयेत् ॥
पुष्पं तु मातुलुङ्गस्य दीपनं ग्राहि शीतलम्।
लघु वातं रक्तपित्तं नाशयेदिति कीर्त्तितम् ॥

अस्य ऋतुपरत्वेनानुपानगुणाः—

सिन्धूत्थेन घनागमे च सितया काले शरत्संज्ञके,
हेमन्ते लवणार्द्रहिङ्गुमरिचैः सिद्धार्थतैलान्वितैः॥
एतैस्तैः शिशिरे मधावपि युतैर्ग्रीष्मे गुडेनान्वि—
तैर्वैद्यैर्भूमिप ! मातुलुङ्गमुदितं सर्वत्र साधारणम् ॥

वनबीजपूरगुणाः—

अम्लः कटूष्णो वनबीजपूरो रुचिप्रदो वातविनाशनश्च।
स्यादामदोषक्रिमिनाशकारी कफापहः श्वासनिषूदनश्च॥ (रा० नि०)

मधुरमातुलुङ्गगुणाः—

मधुरं मातुलुङ्गं तु शीतं रुचिकरं मधु।
गुरु वृष्यं दुर्जरं च स्वादिष्ठं च त्रिदोषनुत् ॥

पित्तं दाहं रक्तदोषान् विबन्धश्वासकासकान्।
क्षयं हिक्कां नाशयेच्च पूर्वैरेवमुदाहृतम्॥

१४ म कर्कटी (चकोतरा) पृ० २४८

हि०-चकोतरा, पपई, अंड काकड़ी, गलगल, गागल। ं०-बाताबिलेबु, मधुकाकड़ी, मउफुटी। म०-पोपई, एरंड पपई, पपनस, गोडमहालुंग। गु०-पोपैयो, एरंड काकड़ो। तै०-कवोप्पई। पं०-मीठानींबु। फा०-लीमुने शर्वती। अं०-Polemo (पोलेमो)
लै०-Citrus Decumana (सिट्रस डिक्युमाना)

९९ जम्बीरद्वयम् (जंमीरी नीबू-छोटी जंमीरी नीबू) पृ० २४८

हि०-जम्भीरी नीबू। बं०-जामीरलेबू, गोंड़ालेंबु। म०-ईडलिंबू। गु०-लांबा लींबु, दो डिंगा लिंबु, इड लिंबु, गधर लिंबू। क०-कनीले, कंचिले, काडलिंबे। तै०-जांभिर, निम्म, निम्म चेट्टु। फा०-लिमुने शिरी।

जम्बीरस्य फलं रसेऽम्लमधुरं वातापहं पित्तकृत्-
पथ्यं पाचनरोचनं बलकरं वह्नेर्विवृद्धिप्रदम्।
पक्वं चेन्मधुरं कफार्त्तिशमनं पित्तास्रदोषापनुद्-
वर्ण्यं वीर्यविवर्धनं रुचिकरं पुष्टिप्रदं तर्पणम्॥ (रा०नि०)

बृहज्जम्बीरगुणाः—

बृहज्जम्बीरकं चाम्लं तुवरं तिक्तकं सरम्।
उष्णं पित्तकफघ्नं च पाचनं परिकीर्त्तितम्।
ये गुणा लघुजम्बीरे ते बृह्द्वे सन्ति चाखिलाः॥

मधुकुक्कुटिका (मीठा जंभीरी नींबू) गुणाः—

मधुकुक्कुटिका शीता श्लेष्मलाऽऽस्यप्रसादनी।
रुच्या स्वादुर्गुरुः स्निग्धा वातपित्तविनाशिनी॥ (रा० व०)।

लिम्पाकगुणाः—

लिम्पाकं सुरभि स्वादु नात्यम्लं भक्तरोचनम्।
वातश्लेष्महरं हृद्यं छर्दिघ्नं नातिपित्तकृत्॥ (रा० व०)

जम्बीरपत्रगुणाः—

पत्रं जम्बीरजं तीक्ष्णं कृमिवातकफापहम्।

सुरभि दीपनं रुच्यं मुखवैशद्यकारकम्।

९६ निम्बूकम् ( नींबू या कागजीनीबू ) पृ० २४९

हि०-कागजीनीबु, नींबू, लेमु, नेमू, कागदी नीमो। बं०-कागजी लेंबु, पातिलेवु। म०-कागदीलिंबु, लघु इंड लिंबु, निंवे। गु०-खाटा गोल लींबु, कागदी लिंबु। क०-कचिले निंबू। तै०-निम्म पंडु। फा०-लिमु-नेतुर्श, लींबू, लीमू। अ०-लिमुने हाजिम, लमू हाजिम।

अं०-Lemon ( लीमन )

लै०-Citrus Acida ( सिट्रस एसिडा )

निम्बूकस्य नामानि गुणाश्च—

निम्बूकं स्यादम्लजम्बीरकाख्यं वह्निदीप्यो वह्निवीजोऽम्लसारः।
दन्ताघातः शोधनो जन्तुमारी निम्बूकः स्याद्रोचनो रुद्रसंज्ञः।

करुण ( कन्ना नींबू ) गुणाः—

करुणं कफवातास्रमेदोघ्नं पित्तकोपनम्॥ रा०व०॥

९७ मिष्टनिम्बूकम् ( मीठा नीबू )पृ० २४९

हि०-मीठा नींबू। सरबती नींबू, कमला नींबू, केवलानीबू। बं०-कमला-लेंबू। म०-साखरलेंबू, गोदलिंबू। गु०-मीठालिंबू, मीठूं लिंबू, मोसंब्बी। क०-कनीले, कीत्तीले। फा०-लिमुनेशिरी। यू०-कवला मोसब्बी। अ०-लिमू नेहुलु। अं०-Sweet Lemons ( स्वीट लीमन्स् )

९८ कर्मरङ्गम् (कम रख) पृ० २४९

हि०-कमरख। बं०-कामरांगा, कामरंगा। म०-कर्मरांचे झाड़, कर्मर। क०-कमरक। गु०-कमरक, कमरंग। मा०-कमरख। पं०-कमरख। तै०-तमर्ता। द्रा०-तम्रतं। अं०-Carambola (करम्बोला)

अं०-Goose Berry Tree ( गूज़ बेरी ट्री )

लै०-Averrhoa Carambola ( एवर्रहोआ कारम्बोला )

कर्मारस्य फलं चामं ग्राह्यम्लं वातनाशकम्।
उष्णं पित्तकरं चैव तत्पक्वं मधुरं मतम्॥
अम्लं च बलपुष्टीनां रुचेश्चैव तु वर्धकम्॥ नि० र०॥

९९ अम्लिका ( इमली ) पृ० २४९

हि०-इमला, तिन्तिडी, अम्लिका, अम्ली । पं०-इम्लो, अंबली । बं०-तेंतुल, आमरुल, तेंकल । म०-चिंच । क०-लुणिसे, हुणिसे, हुणि सेहूण । गु०-आंबलो । तैं०-चिंट, चिंताचेट्टु । उ०-कंआं । ता०-पुलि । मु०-टिंटज । फा०-तिमिर हिन्दी । मा०-आमली । द्रा०-पुलि । अ०-तमर हिन्दी । अं०-Tamarind Tree ( टेमरींड ट्री )

ले०-Tamarindus Indica ( टमरिण्डस इण्डिका )

व्यवहार—फल । मात्रा—१-३ तोले ।

चिञ्चावृक्षो गुरुश्चोष्णश्चाम्लः पित्तकफप्रदः ।
रक्तकोपनकारी च वातनाशकरो मतः ॥
चिञ्चापुष्पं तु तुवरं स्वाद्वम्लं च रुचिप्रदम् ।
विशदं चाग्निजनकं लघु वातकफापहम् ॥
प्रमेहघ्नं समुद्दिष्टं पर्णं शोथहरं मतम् ।
रक्तदोषहरं चैव फलं चास्य तु कोमलम् ॥
अत्यम्लं ग्राहकं चोष्णं रुच्यं चाग्निप्रदीपकम् ।
रक्तपित्तस्य पित्तस्य कफरक्तस्य कोपनम् ॥
वातनाशकरं प्रोक्तं तत्पक्वं वातलं मतम् ।
कफपित्तकरं चैव तत्पक्वं मधुरं सरम् ॥
अम्लं हृद्यं भेदकं च मलस्तम्भकरं मतम् ॥
दीपनं रुचिदं चोष्णं रूक्षं वस्तिविशोधनम् ॥
व्रणदोषं कफं वातं जन्तूंश्चैव विनाशयेत् ।
शुष्कं चिञ्चाफलं हृद्यं लघु भ्रान्तिश्रमापहम् ॥
तृषाहरं क्लमहरं क्रिमिनाशकरं मतम् ।
चिञ्चा तु नूतना वातकफस्य कारिणी मता ॥
सा वार्षिकी वातपित्तनाशिनी परिकीर्त्तिता ।
चिञ्चाक्षारश्चाग्निमान्द्यशूलनाशकरो मतः ॥
पक्वचिञ्चारसश्चाम्लो मधुरो रुचिकृन्मतः ।
व्रणनाशकरश्चैव लेपनाच्छोथपक्तिहृत् ॥

चिञ्चासारं दाहकफकारकं चाधिकाम्लकम् ।
वातनाशकरं प्रोक्तं समानशर्करायुतम् ॥
दाहं पित्तं कफं चैव नाशयेदिति कीर्त्तितम् ॥ नि० ८० ॥

६० अम्लवेतसः ( अमलबेंत । ) पृ० २४९

हि०-अमलबेंत, अम्लबेंत । बं०-थैकर, अम्ल वेतस । म०-चुका । फा०-तुर्षक । यू०-अमलबेद । गु०-अम्लबेद ।

व्यवहार—गूदी । मात्रा-१-३माशे ।

अम्लवेतसमत्यम्लमानाहकफवातजित् ।
तदेव सिद्धं दोषघ्नं श्रमघ्नं ग्राहि गुर्वपि ॥ ( रा० व० ) ।

६१ वृक्षाम्लम् ( कोकम ) पृ० २५०

हि०-विषांबिल, कोकम, बिखाबिल, महादा । बं०-महादा, अमलकुटा, चुकातेंतुल । म०-आम सोल, कोकम, आमटै । गु०-कोकम । क०-तित्ती-ड़िक । को०-कोकंब सोल । गोवा०-विडोओ । मा०-कोकन, डांसर्या । प०-डांसरां, समाकदाना ।

अं०-Kokam Butter Tree (कोकम बटर ट्री )

ले०-Garcinia Indica ( गारसिनिया इण्डिका )

व्यवहार-फल-गूदी । मात्रा-३-४ माशे ।

इति सप्तम आम्रफलादिवर्गः ॥ ७ ॥

## अथाष्टमो धात्वादिवर्गः ॥ ८ ॥

१ सुवर्णम् ( सोना ) पृ० २५१

हि०-सोना, सुवर्ण । बं०-सोना, स्वर्ण, सुवर्ण । म०-सोने । गु०-सोना, सोनु । ते०-बंगार, बंगारमु, बंगारम, भंगार । पं०-सोन्ना । फा०-तिला, जर । मा०- सोनो । क०-स्वर्ण, चिन्न । द्रा०-तगं । अ०-जहब । अं०-Gold ( गोल्ड ) । ले०-Ouram ( ओरम् )

व्यवहार—( धातु ) शुद्धभस्म । मात्रा—½ से १ रत्ती ।

दह्यन्ते धातवो वह्नौ मणिरत्नाभ्रकादयः ।

न क्षीयते न म्रियते सुवर्णमजरामरम् ॥
अपक्वहेम संघृष्टं शिलायां जलयोगतः ।
द्रवरूपं तु तत्पेयं मधुना गुणदायकम् ॥
मध्वामलकचूर्णं च वरकश्चेति तत्त्रयम् ।
प्राश्यारिष्टगृहीतोऽपि मुच्यते प्राणसङ्कटात् ॥

२ रूप्यम् ( चाँदी ) पृ० २५२

हि०-चान्दी, चानो, रूपा । बं०-रूप, रूपा । म०-रूपें, चांदी । गु०-रुपुं । क०-बेल्ले । ते०-एड़ी, एडो, वेंडि । फा०-नुक़रा, सीम । अ०-फिद्दा, फिज्जाह् । अं०-Silver ( सिल्वर ) ।

ले०-Argentum ( आर्जेण्टम ) ।

व्यवहार—( धातु ) शुद्धभस्म । मात्रा— ½ से १ रत्ती ।

सितया हन्ति दाहाद्यं वातपित्तं फलत्रिकात् ।
त्रिसुगन्ध्या प्रमेहादीन् रजतं हन्त्यसंशयम् ॥

३ ताम्रम् ( तामा ) पृ० २५३

हि०-तामा, तांबा, तम्मा । बं०-तामा । म०-तांबे । गु०-तांबु, त्रांबु । अ०-नुहास, नहास, नोहास । तै०-रागी । ता०-सेनबु, शेंनबु । क०-ताम्र । फा०-मिस । अं०-Copper ( कॉपर ) ।

ले०-Cuprum ( क्युपरम ) ।

व्यवहार—( धातु ) शुद्धभस्म । मात्रा—१ चावल से १ रत्ती ।

४ वङ्गम् ( रांगा ) पृ० २५४

हि०-रांगा, रंगा, कलई, वंग, टीन, कथील । म०-कथील, वंग, कथीर । बं०-रांगा, वंग । क०-तवर । फा०-अरज़ाज़, अरज़ार, अखीज़ । तै०-तागारामु, वंगमु । अ०-रूसास, रसासुल, अबियज़ । द्रा०-वंग । पं०- रांगा । गु०-कलई, कथीर, खरिपारि ।

व्यवहार— शुद्धभस्म । मात्रा—१-२ रत्ती ।

क्षुरकवंग के नाम—

खुरक, खुरारांगा, खुरासानी रांगा, खुरवंग ये सब हैं । यही उत्तम होता है । हिरण्यखुरीरांगा भी नाम है ।

अं०-Tin ( टिन )। ले०-Stannum ( स्टेन्नम् )

कासे श्वासे च मन्दाग्नौ पीनसे विषमज्वरे ।
प्रमेहे पाण्डुरोगे च मृतं वङ्गं प्रयोजयेत् ॥

अशोधितवङ्गदोषाः—

वङ्गं विधत्ते खलु शुद्धिहीनं तथा ह्यपक्वं च किलासगुल्मौ ।
कुष्ठानि शूलं किल वातशोथं पाण्डुं प्रमेहं च भगन्दरं च ॥
विषोपमं रक्तविकारवृन्दं क्षयं च कृच्छ्राणि कफं ज्वरं च ।
मेहाश्मरीविद्रधिमुख्यरोगान्नागोऽपि कुर्यात् कथितान्विकारान् ॥
धवलं मृदुलं स्निग्धं द्रुतद्रावं सगौरवम् ।
निःशब्दं खुरवङ्गं स्यान्मिश्रकं श्यामशुभ्रकम् ॥

श्रेष्ठवङ्गलक्षणम्—

श्वेतं मृदु लघु स्वच्छं स्निग्धमुष्णसहं हिमम् ।
सूत्रपत्रकरं कान्तं त्रपु श्रेष्ठमुदाहृतम् ॥

५ यशदम् ( जस्ता ) पृ० २६४

हि०-जस्ता, यशदधातु, जसता । म०-जस्त । तै०-खर्पर । अ०-शवह, शिवह । पं०-जसद, जसदा । बं०-दस्ता । गु०-जसत । फा०-रुए तुतिया, रूमीतूतिया । मा०-जस्त । अं०-Zinc ( ज़िङ्क ) ।
ले०-Zincum ( ज़िङ्कम् )

व्यवहार—शुद्धभस्म । मात्रा—१-३ रत्ती ।

६ सीसम् ( शीशा ) पृ० २६४

हि०-शीशा, शीसा, सीसा । बं०-सीसा, सीसे । म०-सिसें, शिसें । गु०-शीसुं । क०-सीसा । फा०-सुर्ब, सुरब, सुरब स्याह । अ०-रिसासुल्अस्वद, रिसासे अस्वद । ते०-शीश, शीषमु । द०-शीशा । पं०-शीसा । मा०-सीसो । द्रा०-करुनाहं । अं०-Lead ( लेड ) ।
ले०-Plumbum ( प्लुम्बम् ) ।

व्यवहार—( धातु ) शुद्धभस्म । मात्रा—१-२ रत्ती ।

नागस्य प्रकारभेदाः—

नागं तु द्विविधं प्रोक्तं कुमारं समलं तथा ।
कुमारं सर्वकार्येषु योजनीयं गुणाधिकम् ॥

द्रुतद्रावं महाभारं छेदे कृष्णं समुज्ज्वलम् ।
पूतिगन्धं बहिःकृष्णं शुद्धसीसमतोऽन्यथा ॥

७ लोहम् ( लोहा ) पृ० २५५

हि०-लोह, लोहा, इस्पात, फौलाद । बं०-लौह, तिखा, इस्पात्, काल-लौह । म०-लोखण्ड, पोलाद, तिखें । गु०-लोढुं, पोलुं, गजवेल । क०-अयस्कान्त, कब्बिण । अ०-हदीद, हजरुल । ते०-इनमु, इनुमु । मा०-लोह । पं०-लोहा । द्रा०-इरुम्बु । फा०-आहन, फौलाद, संगे आहन । अं०-Iron (आइरन) । और Steel (स्टील) । ले०-Ferrum(फेरम्) ।

व्यवहार- शुद्धभस्म । मात्रा—१-२ रत्ती ।

कान्तलोहनामानि—

तीव्रं लोहमयस्कान्तं कृष्णायो लोहकान्तकम् ।

कृष्णलोहनामानि—

वर्त्तलौहं तीक्ष्णलौहं नीलिका पुटलोहकम् ॥

मुण्डलोहगुणाः—

मुण्डं रूक्षोष्णतिक्तं च वातपित्तकफप्रणुत् ।
तीक्ष्णं पाण्डुहरं तच्च शूलमेहनिवारणम् ॥

लोहसेविनां कार्याणि—

गुञ्जामेकां समारभ्य यावत्स्युर्नवरक्तिकाः ।
तावल्लोहं समश्नीयाद् यथादोषबलं नरः ॥

लोह के भेद—



८ ( किट्टी ) मंडूरम् ( मंडूर ) पृ० २९६

हि०-मंडुर, कीट, कीटी, किट्टी, लोहेका मैल, मनूर । फा०-चर्क आहन, अरेम आहन ।

व्यवहार—शुद्धभस्म । मात्रा-१-३-रत्ती ।

मण्डूरभेदाः—

शतोर्ध्वमुत्तमं किट्टं मध्यं चाशीतिवार्षिकम् ।
अधमं षष्टिवर्षीयं ततो हीनं विषोपमम् ॥

जो मण्डूर-तौल में भारी, छूने में चिकना, तोड़ने में ठोस और अञ्जन के समान तथा जिसमें बहुत गड्ढे न हों वह उत्तम समझा जाता है। 'देखने में काले रंग का, वजन में भारी, स्वाद में कसेला' यह साधारण मण्डूर का लक्षण है।

## अथोपधातवः ।

९ स्वर्णमाक्षिकम् ( सोनामाखी ) पृ० २९६

हि०-सोनामाखी, सोनामक्खी । बं०-स्वर्णमाक्षिक । म०-सुवर्णमाक्षिक, दगड़ी, सोनामखी, सोनामुखी । मा०-सोनामक्खी । गु०-सोनामाखी । तै०-स्वर्णमाखी । पं०-सन्नेमखी । क०-धातुमाक्षिक । फा०-चर्कतिला । अ०-मुर्क शीशा जड़वी, मरक शाशा, सब सज्जहब ।

अं०-Iron Sulphide ( आयरन सल्फाइड) ।

लै०-Ferry Sulphuretum ( फेरि सल्फरेटम् )

व्यवहार-शुद्धभस्म । मात्रा-१-३ रत्ती ।

उत्तम सोनामाखी—सुवर्णका सा वर्णवाला, भारी, चिकना, किंचित् नीलछवि-युक्त, कसौटी पर कसने से सोनेके समान झलक देनेवाला समझना चाहिये ।

१० तारमाक्षिकम् ( रूपामाखी ) पृ० २९७

हि०-रूपामाखी, रूपामक्खी, तारामुखी । बं०-तारमाक्षिक, रौप्यमाक्षिक । म०-रौप्यमाक्षी । गु०-रूपामाखी ॥ क०- यरडुमाक्षिक । तै०-रूपा माखी । फा०-चिर्क नुकरह । अ०-अकली मायफिज्जह, खब्सुल फिज्जह, मुर्क शीशा फिद्दा ।

व्यवहार-शुद्धभस्म । मात्रा-१-३ रत्ती ।

११ तुत्थम् ( तूतिया ) पृ० २५७

हि०-तूतिया, तूंतिया, तुतिआ, नीलाथोथा, लीलाथोथा। बं०-तुते, तुतिया। म०-मोरचूत, मोरचूक, मोरचूद। गु०-मोरथुथु। क०-मयूरतुत्थ, मैलतुत्त। तै०-मेलतुतु, मेलततु। फा०-तूंदिया, तूतियासब्ज। अ०-तूतिया अक्जर, तूतिया अखजर, तूतियाहिन्दी। द्रा०-मैलतुत्तं।

अं०-Sulphate of Copper ( सल्फेट ऑफ् कापर )

"- Blue Stone ( ब्ल्यू स्टोन )

लै०-Cuprea Sulphus ( क्युप्रिया सल्फस )

व्यवहार—शुद्ध भस्म। मात्रा— ॥ से १ रत्ती।

वमने मण्डले दद्रौ विषे चैव प्रशस्यते।

१२ कांस्यम् ( कांसा ) पृ० २५८

हि०-कासा, कांसो, काम्य। म०-कांसे। गु०-कांसु, कंचु। तै०-कंचु। फा०-रोई, रोइन्। अ०-तालिकून। वंगलं। बं०-कांसा।

अं०-White Copper ( ह्वाइट कौपर )

,, White Brass ( ह्वाइट ब्रास )

लै०-Bronze ( ब्रान्ज़ि )

१ फूल और २ तेलक भेदों से कांसा दो प्रकार का होता है। फूलकांसा-श्वेतवर्ण अत एव उत्तम है, तैलक कांसा-निकृष्ट।

जो कांसा-सफेद वर्ण, प्रकाशवान् , नरम, उज्ज्वल, शब्द करनेवाला चिकना, निर्मल, घनकी चोट सहने वाला, और लकीरदार हो वह श्रेष्ठ है।

घृतमेकं विना चान्यत् सर्वं कांस्यगतं नृणाम्।
उक्तमारोग्यसुखदं हितं सात्म्यकरं तथा॥

१३ आरकूटम् ( पीतल ) पृ० २५८

हि०-पित्तल ( र ), पीतल ( र )। बं०-पितल। क०-पित्ताले यरडु। तै०-इत्तडी। फा०-बिरंज। अ०-ब्रास। म०-पितल। गु०-पीतल।

अं०-Brass ( ब्रास )

व्यवहार—शुद्धभस्म। मात्रा—१-२ रत्ती।

पीतल दो प्रकार का होता है-(१)राजरीति। (२) काकतुण्डी।

राजरीति—यह पीतल अग्नि में तपाकर कांजी में बुझाने से तांबे

के समान लाल हो जाता है।

काकतुण्डी—यह बुझाने पर काला हो जाता है।

१४ सिन्दूरम् ( सिन्दूर ) पृ० २९८

हि०-सिन्दूर, सेनूर, सेंदुर। बं०-सिन्दूर, सिन्दुर। म०-शेंदूर, शेंदुर। ते०-सिन्दुरमु, चेन्दिरमु। द्रा०-सिम्दूरं। ता०-चेन्दूरम्। क०-सिन्दूर:। मा०-गु०-प०-सिन्दूर। फा०-सिरिंज। अ०-असरंज। अं०-Red Lead ( रेड लेड )

१५ शिलाजतु ( शिलाजीत ) पृ० २९९

हि०-शिलाजित, शिलाजीत, सिलाजीत। बं०-शिलाजतु। बं०-म०-गु०-द्र०-शिलाजित। क०-कुलुबेचलु, कलुबेचरु। मा०-सलाशीत, शलाजीत। पं०-शिलाजीत। ते०-शिलाजतु। क०-सिलाजितु। य०-शिलाजीत का सत्त, सत्त शिलाजीत। अं०-Jew,s Pitch ( ज्युस् पिच )
,,—Aspholt ( आस्फाल्ट )

ले०-Asphaltum Punjabinum ( आस्फाल्टम पंजाबिनम् )

व्यवहार—शुद्ध। मात्रा—१ रत्ती से १ माशा।

श्रेष्ठशिलाजतुलक्षणम्—

गोमूत्रगन्धवत्कृष्णं स्निग्धं मृदु तथा गुरु।
तिक्तं कषायं शीतञ्च सर्वश्रेष्ठं तदायसम्॥
शिलाजं कफवातघ्नं तिक्तोष्णं क्षयरोगनुत्।
वह्नौ क्षिप्तं भवेद् यत्तल्लिङ्गाकारमधूमकम्॥

अशुद्धशिलाजतुदोषाः—

अशुद्धं दाहमूर्च्छायभ्रमपित्तास्रशोणितम्।
शिलाजतु प्रकुरुते मान्द्यमग्नेश्च विड्ग्रहम्॥

---

## अथ रसः।

१६ पारदः ( पारा ) पृ २९९

हि०-पारा। बं०-म०-पं०-पारा। मा०-गु०-मारो। क०-पारदरस। ते०-पारदरसं, पारदमु। द्रा०-पारदरसं। फा०-सिमाव। अ०-जविक,

जीवक । अं०-Mercury ( मर्क्युरी )

लै०-Hydrargyrum ( हैड्रार्जिरम )

व्यवहार—( शुद्ध ) भस्म । मात्रा— ½ से २ रत्ती ।

पारदे पथ्यानि—

हितं मुद्गान्नदुग्धाजशाल्यन्नानि सदा ततः ।
शाके पुनर्नवा देवि ! मेघनादं सवास्तुकम् ॥
सैन्धवं नागरं मुस्ता मूलकानि च भक्षयेत् ।
आत्मज्ञानं कथा पूजा शिवस्य च विशेषतः ॥
एतांस्तु समयान् भद्रे ! न लङ्घेद् रसभक्षकः ( नि० र० )

पारदप्रशंसा—

मृदः कोटिगुणं स्वर्णं स्वर्णात् कोटिगुणं मणिः ।
मणेः कोटिगुणं बाणो बाणात् कोटिगुणं रसः ॥
रसात्परतरं लिङ्गं न भूतं न भविष्यति ॥ नि० र० ॥

---

## अथोपरसाः ।

### १७ हिङ्गुलम् ( सिंगरफ ) पृ० २६१

हि०-सिंगर( रि ) फ, सिम (मि) रख, हिंगुल, इंगुर । बं०-हिंगुल । म०-हिंगूल । गु०-हिंगळो । क०-इंगुळियक । ते०-हिंगिळाकामु, इंगली-कमु । मा०-हिंगलू । पं०-शिंगरफ । द्रा०-जाविलिंग । यू०-ईंगुर । फा०-सिंग्रफ, शंगरफ । अ०-जंजफर, शंजरफ ।

अं०-Sulphuret of Mercury ( सल्फरेट ऑफ् मर्क्युरी )

लै०—Sulphuretum Hydrargyri ( सल्फ्युरेटम हाइड्रार्जिरी )

व्यवहार—भस्म । मात्रा—½-२रत्ती ।

हिङ्गुलनिर्माणविधिः—

अशुद्धपारदं भागं चतुर्भागं तु गन्धकम् ।
उभौ क्षिप्त्वा लोहपात्रे क्षणं मृद्वग्निना पचेत् ॥
कृत्वाऽथ खण्डशस्तत्र काचकूप्यां निरुद्धय च ।
वस्त्रमृत्तिकया सम्यक् काचकूपीं प्रलेपयेत् ॥

सर्वतोऽङ्गुलमानेन छायाशुष्कं तु कारयेत्।
बालुकायन्त्रगर्भे तु दिनं मृद्वग्निना पचेत् ॥
क्रमवृद्धयाऽग्निना पश्चात् पचेद्दिवसपञ्चकम्।
सप्ताहं तु समुद्धृत्य हिङ्गुलः स्यान्मनोहरः ॥

१८ गन्धकः ( गन्धक ) पृ० २६१

हि०-गन्धक, गन्हक। बं०-म०-क०-गु०-गन्धक। ते०-गन्धकमु। फा०-गागिर्द। अ०-किब्रित। अं०-Sulphur ( सल्फर )
लै०-सल्फर।

व्यवहार—शुद्ध। मात्रा—१-७ माशे।

श्रेष्ठगन्धकलक्षणम्—

शुकपञ्चसमच्छायो नवनीतसमप्रभः।
मसृणः कठिनः स्निग्धः श्रेष्ठगन्धक उच्यते ॥

१९ अभ्रकम् ( अबरक ) पृ० २६२

हि०-अबरक, अभरक। बं०-अभ्र। गु०-अभरख। मा०-भोंडल। फा०-सितारये जमीन्। अ०-तल्लक, तल्क। क०-अभ्रक। ते०-अभ्रकम्।
लै०-Mica ( मिका )
अं०-Talc ( टाल्क )
,, Glimmer ( ग्लिमर )

व्यवहार—भस्म। मात्रा—१-३ रत्ती।

अभ्रकसेवनेऽपथ्यानि—

क्षाराम्लं द्विदलं चैव कर्कटीं कारवेल्लकम्।
वृन्ताकं च करीरं च तैलं चाभ्रे विवर्जयेत् ॥

२० हरितालम् ( हरताल ) पृ० २६३

हि०-हरताल, हरिताल। बं०-हरिताल, हत्तेल। म०-हरताळ। गु०-हड़ताल। पं०-हडताळ। मा०-हरताल। ते०-हरिदलमु, हरितालामु। द्रा०-अरिदलम्। क०-हरिदाळ। अ०-अरनीख, ज़रीख अस्फर।
अं०-Orpiment ( ऑर्पिमेण्ट )।
,,-Yellow Arsenic ( यलो आर्सेनिक )

व्यवहार—( शुद्ध ) भस्म। मात्रा—½-२ रत्ती।

पिंजरं पित्तलं तालं मनोज्ञं हरितालकम् ।
छत्राङ्ककाञ्चनरसं गोदन्तं नरमण्डनम् ॥
तालकस्यैव भेदोऽस्ति मनागेव तदन्तरम् ।
तालकं चातिपीतं स्याद्भवेद्रक्ता मनःशिला ।
हरितालोऽष्टधा प्रोक्तो गोदन्तः सर्वतोऽधिकः।
तदभावे तु पत्राख्यो वयसः स्थापनः परः ॥

हरितालभस्मानुपानम्—

सर्वरक्तविकारेषु देयमाम्रहरिद्रया ।
सुहालाहलजोराभ्यामपस्मारहरं परम् ॥
समुद्रफलयोगेन जलोदरविनाशनम् ।
देवदालिरसैर्युक्तं भगन्दरहरं परम् ॥
फिरङ्गदोषजं रोगं जातं हन्ति सुदुस्तरम् ।
विसर्पमण्डलं कण्डूपामाविस्फोटकं तथा ॥
वातरक्तकृतान् रोगानन्यानपि विनाशयेत् ।

हरितालसेवने नियमाः—

क्षाराम्लौ च कटुं त्यक्त्वा मिष्टभोजनमाचरेत् ।

हरताल के प्रचलितभेद—

१ पिण्डाख्य ( पिण्डहरताल, गोबरिया हरताल )
२ पत्रसंज्ञक हरताल ( पत्र हरताल, तावकी हरताल, तवकिया हरताल,
३ गोदन्ती हरताल ।
४ बकदाली हरताल ( बदकाली, बगदादी हरताल )

२१ मनःशिला ( मैनशिल ) पृ० २६४

हि०–मयनसिल, मनसिल, मैनसिल । बं०–मनछाल, मनछल । म०–मनशाळ । गु०–मणशल । क०–मनशिले । मणिशिले । ते०–मानुशिला । अ०–जरनेख, एहमर । ॅ०–Realgar ( रील गार ) ।
लै०–आर्सेनिक सल्फैडम् ।

व्यवहार—( विषयुक्त ) शुद्ध । मात्रा—१–४ रत्ती ।

यह ३ प्रकार की होती है, १ श्यामाङ्गी, २ कणवीरका ३ खण्डाख्या इनमें उत्तरोत्तर उत्तम होती हैं ।

२२ स्रोतोऽञ्जनम् ( अञ्जनम्-सुरमा ) काला सुरमा पृ० २६४

हि०-सुरमा, सुर्मा, काला सुरमा, शुर्म्मा, अंजन, आंजन। बं०-नील-शुर्म्मा, नीलाञ्जन, कालसुर्मा। म०-काला सुरमा। मा०-सुरमो, कालो-सुरमो। गु०-सुरमो, कालो सुरमो। क०-स्रोतोऽञ्जन, अञ्जनद् कल्लु। द्रा०-अञ्जनक्कल्। पं०-सुरमा। ते०-अञ्जनमु। फा०-सूर्मे अस्फहानी। अ०-कुह्ल इस्मुद।

अं०-Black Antimony ( ब्लेक एण्टीमनी )।

ले०-Antimonium Sulphuratum ( एण्टिमोनियम सल्फ्युरेटम् )।

"सुरमा इस्पहानि" के नाम से जो सुरमा बम्बई में मिलता है वह उत्तम होता है। किंचिद् धूसरश्याम वर्ण का दानेदार चूर्णवाला सुरमा सर्वोत्तम होता है।

कन्धारी सुरमे का लैटिन नाम-Galena (गैलेना) या Sulphuret of Iead ( सल्फ्युरेट ऑफ् लेड ) है। यह नकली सुरमा है। एक काले सुरमे का भेद "सुरमी" होती है।

२३ सौवीरम् ( सफेद सुरमा ) पृ० २६४

हि०-सफेद सुरमा। बं०-श्वेत सुर्मा। म०-लाल सुरमा, पांढरा सुरमा। गु०-लाल सुरमो।

लक्षणों में "स्रोतोऽञ्जन" के समान परन्तु कुछ पीले रङ्ग का जो हो उसे वास्तव में "सौवीराञ्जन" समझना चाहिये, बाजारों में जो प्रायः मिलता है वह संगमर्मर का एक भेद है नकि "सफेद सुरमा"।

सौवी ' मधुरं शीतं कषायं स्निग्धलेखनम्।
रक्तपित्तविषच्छर्दिहिक्काघ्नं दृक्प्रसादनम्॥

पुष्पाञ्जनस्य नामानि गुणाश्च-

सं०-पुष्पाञ्जनं तु कौसुम्भं रीतिकं कुसुमाञ्जनम्। हिं०-बं०-पुष्पा-ञ्जन। म०-तितलें चे कोट, पुष्पाञ्जन। गु०-कसांजण। क०-पुष्पांजन। तै०-पुष्पांजनमु। अं०-Z nc Oxide ( झिंक आक्साइड )।

लै०-Zinci Oxidum ( झिन्साई आक्सिडम )

पुष्पाञ्जनं हिमं प्रोक्तं पित्तहिक्काप्रदाहनुत् ।
नाशयेद्विषकासार्त्तिं सर्वनेत्रामयापहम् ॥ रा० नि० ॥

२४ टङ्कणः ( सोहागा ) पृ० २६४

हि०-सोहागा, सुहागा, सोहग्गा । बं०-सोहागा । म०-टङ्कणखार, स्वांगी खार, स्वागी । मा०-सोगी । गु०-टंकण, टंकण पाढ़ियो, टंकण-फुलियो, टंकण खार । क०-टंकण खारु, बिलिय टंकणु, बेलगार, एलिगारं, बेलिगारमु । पं०-सुहागा । द्रा०-बणगारं । फा०-तीगार, तनकार, तन्का-र । अ०-बुरग, जबदुल, बूरग । अं०-Borax ( बोरेक्स ) या Bibo-rate Of Soda ( बायबारेट् ऑफ् सोडा ) ।

लै०-Sodas Biboras ( सोडास् बाइबोरास् )

व्यवहार-श्वेतपिण्ड शुद्ध । मात्रा १-३ माशे ।

सुहागा के दे। भेद हैं-१ पिण्डाकार सुहागा-यह धातुओं के गलाने के काम में आता है । २ चौकिया सुहागा-यह औषध के योग्य होता है ।

२५ स्फटिका ( फटकरी ) पृ० २६५

हि०-फिटकिरी, फटकरी, फटकिरी । बं०-फटकिरी । म०-तुर्टी, फटकड़ी, तुरटी । मा०-गु०-क०-फटकी । ते०-फाटिका, पाटिकारमु । द्रा०-पटिकारं । फा०-ज़ाक सफेद । अ०-ज़ाज़ अबियज़ । अं०-Alum ( एलम )

लै०-Potassium Aluminium Sulphati ( पोटास्सियम एल्युमि-नियम सल्फेटी ।

व्यवहार-पिण्ड शुद्ध । मात्रा-½ से १ मासे ।

स्फटिका नामक सौराष्ट्रदेश की मिट्टी गोपीचन्दन Bouxite बोक्सा-इट में $H_2 SO_4$ डाल छान छने द्रव का गाढ़ा कर 'पोटासियम सल्फेट' या 'अमोनियम सल्फेट' को मिला कर गाढ़ाकर एकान्त में रखदेने से फिटकिरी बन जाती है ।

२६ राजावर्त्तः ( रेवटी ) पृ० २६५

हि०-रेवटी, रावटी, लाजवर्द । बं०-राजावर्त्त । म०-क०-गु०-रा-जावर्त्तमणि । मा०-प०-लाजवर्द । अं०-Lapis Lazuli ( लेपिस लेजुली ) ।

यह उपरत्न है । कुछ २ लाल और अधिक नीला मिश्रित, तौल में भारी, चिकना, चकचकाहट युक्त जो लाजवर्द हो उसे उत्तम समझना चाहिये ।

२७ चुम्बकः । पृ० ५६९

हि०-चुम्बक, लोहचुम्बक । यू०-सङ्गचुम्बक । फा०-सङ्गचकमाग, सङ्गआतीस, सङ्गआहन रूवा । अ०-हजरुलनार, हजरमिकना तीस, मीकनातीस । म०-लोहचुम्बक । गु०-चमक ।

चुम्बक भूरे तथा काले रङ्ग का एक प्रसिद्ध पत्थर है इसे फोलाद के साथ रगड़ने से आग उत्पन्न होती है ।

२८ गैरिकम् ( गेरू ) पृ० २६९

हि०-गेरू, गेरमाटी, गेरुमट्टी । ब०-गिरिमाटा, गेरिमाटि । ते०-जाजु । पं०-गेरी । यू०-गवरूरा । फा०-गिलेसुर्ख मिश्री । अ०-तीनुल एहमर मग़रबी । अं०-Red Chalk ( रेड चाक ) या Oker ( ओकर )

ले०-Bole Rubra ( बोल रुब्रा )

यह पत्थर के समान कठिन और तामे के समान लाल होने से "पत्थर गेरू" कहा जाता है ।

२९ स्वर्णगैरिकम् ( सोनागेरू ) पृ० २६९

हि०-सोन (ना) गेरू, पीतगेरू, सोनगेर, गजनो । बं०-लालगिरीमाटी । म०-ताम्बेगेरू, सोनगेरू । गु०-पोनागेरू, सोनागेरू । क०-होजाथु ।

सुवर्णगैरिकं स्निग्धं मधुरं तुवरं मतम् ।
चक्षुष्यं शीतलं बल्यं व्रणरोपणकारकम् ॥
विशदं कान्तिकृत् प्रोक्तं दाहं पित्तं कफं जयेत् ।
हिक्कां रक्तरुजं जूर्त्तिं विषं विस्फोटकं वमिम् ।
अग्निदग्धव्रणं चार्शो रक्तपित्तं च नाशयेत् ॥

३० खटिका ( खड़िया या तेलिया खड़ी ) पृ० २६९

हि०-खरिया, खड़ो, खड़िया, खल्ली, खड़िया मट्टी । बं०-खड़ि माटी, चाखड़ी, खड़ो, रामखड़ो । म०-खडू । गु०-खडी । क०-बेणेब्रहु । य०-मिट्टीखरिया । फा०-गिले, खड़िया । अ०-तिने अवोयद । अं०-Chalk

( चाक ) या Pipe Clay ( पाइप क्ले )

ले०-Carbonate Of Calcum ( कार्बोनेट ऑफ् काल्कम )

यह लालिमा लिये सफेद और कठिन होती है ।

३१ गौरखटिका ( सफेद खड़ी ) पृ० २६५

हि०-सफेद खड़ा ( खरी, खारिया इत्यादि ) बं०-गौरखड़ी । फा०-गिले सुफेद ।

यह दूधकी भांति श्वेतवर्ण, स्पर्श में चिकनी, और कोमल होती है ।

३२ बालुका ( बालू ) पृ० २६६

हि०-बालू, बालु, रेत, रेता, रेती । बं०-बालि, बाली । म०-बालु । गु०-रेती, बेलु । क०-मललु, हालुल । ते०-विशिका । फा०-रेग । अ०-रमल । अं०-Sand ( सैण्ड ) । लै०-Silica ( सिलिका )

सिकता मधुरा शीता लेखनी तापनाशिनी ।
अग्निदग्धव्रणं चैव व्रणोरःक्षतनाशिनी ॥
श्रमकुष्ठहरी चास्याः स्वेदनं वातनाशनम् ॥ ( र० )

३३ खर्परी ( खपरिया ) पृ० २६६

हि०—खपरिया, संगबसरी, थोथा, खर्परिया । बं०-खापर । म०-कलखापरी । गु०-खपरियुं, खापरियूं । क०-खर्परी । ते०-खर्पर । यू०-खमरिया, खमरिआ । फा०-संगबसरी । अ०-तूतिया किरमानी, तुतिया मकसुल, तुतिया फिरमानी । पं०-खपरिट्टा । मा०-खर्पयो । अं०-Black jack ( ब्लेक जाक ) । ले०-Zinci Sulphidum ( ज़िङ्की सल्फाइडम )

व्यवहार-शुद्धभस्म । मात्रा-१-४ रत्ती ।

यह लवणके समान खानिज उपधातु, सफेद तथा भूरे रंगकी होती है । तथा सदल-निर्दल भेद से २ प्रकार की होती है । इनमें सदल को "दर्दुर" और निर्दल को "कारबेल्लक" कहते हैं, यही श्रेष्ठ भी है ।

३४ काशीशम् ( कसीस ) पृ० २६६

हि०-कसीस, काशीस, हीरा का (क)सीस । पुष्पकासीस । बं०-धातु-कासीस, हीराकस, धातु कसीस, पुष्पकासीस । म०-हीराकस, श्वेतनीली । क०-कासीसे, कासीस, कसीस । गु०-हीराकसा । बे जातना छी नीली तथा धोली । फा०-ज़ाके सब्ज, ज़ाकज़र्द । अ०-जाजे अखदुर, जाजे

अस्रूर । अं०-Sulphate of Iron ( सल्फेट ऑफ् आयरन )
लै०-Ferry Sulphas ( फेरी सल्फाज़ ) ।

**काशीशलक्षणम्—**

भस्मवन्मृत्तिकाऽम्लं च काशीशं धातुरित्यपि ।
तदेव किंचित्पीतं तु पुष्पकाशीशमुच्यते ॥
पुष्पकाशीशकं तिक्तं शीतं नेत्रामयापहम् ।
लेपेन पामाकुष्ठादिनानात्वग्दोषनाशनम् ॥

**पुष्पकाशीशनामानि—**

द्वितीयं पुष्पकाशीशं वत्सकं च मलीमसम् ।
ह्रस्वं नेत्रौषधे योज्यं विशदं नीलमृत्तिका ॥

कासीस को "प्रोटो सल्फेट ऑफ् आयरन" भी कहते हैं ।

**३९ सौराष्ट्री मृत्तिका ( गोपी चन्दन—सोरठा माटी ) पृ० २६६**

हि०-गोपीचन्दन, सोरठ की मट्टी, सोरठी माटी, सोरठी मिट्टी । म०-सोरठ माती । क०-तुरब्रीयमणु । गु०-सोरठी माटी । अं०-Silicate of Alumina ( सिलिकेट ऑफ् एल्युमीना )

यह सोरठदेश ( काठियावाड़ के समीप का देश ) की मिट्टी है-इसे तुवरी या गोपीचन्दन कहते हैं-यह दो प्रकार की होती है ।

१ स्फटिका २ छिल्लिका ।

स्फटिका-किंचित् पीली, भारी और चिकनी होती है ।

छिल्लिका-भारी, सफेद, चिकनी और खट्टा होती है ।

उत्तम गोपीचन्दन-वही है जो सफेद वस्त्र पर मंजीठ के समान रंग दे ।

गोपीचन्दनं शीतं दाहव्रणविषापहम् ।
विसर्पशमकं लेपात्पतद्गर्भस्थिरीकरम् ॥

**३६ कृष्णमृत्तिका ( काली मिट्टी ) पृ० २६६**

हि०-काली मिट्टी, मिट्टी, कृष्णमृत्तिका, करियामाटी । बं०-माटी, कालमाटी । म०-कालीमाती । गु०-कालीमाटी । तै०-नोबुलु ।

यह चिकनी, लसदार और काले रङ्ग की होती है ।

प्रलेपाद्विनिहन्त्येषा शोथं भल्लातसंभवम् ॥

३७ कर्दमः ( कीचे ) पृ० २६६

हि०-कींच, गारा मिट्टी, कादो, पांकी । ब०-कादा, माटी, कालमाटी । म०-चिखल, माती । गु०-गारो, कालीमाटी, कादव । तै०-नोबुलु । अं०-Mud ( मड ), Black Clay ( ब्लैक क्ले )

पङ्कस्तु जलकल्कश्च चुलुकः कर्दमो मलः ।
चिकिलः पलितो द्रापः पललश्च निषद्वरः ॥

३८ कपर्दकः ( कौड़ी ) पृ० २६६

हि०-कौड़ी, कौरी, कवड़ी ( री ) । सं०-कपर्दकः, वराटः, कपर्दी, वराटिका । क०-म०-कवड़ी । फा०-खरमोहरह, खरमोहरा । बं०-कड़ि । गु०-कोड़ो । अ०-दोअ । अं०-Covries ( कोवरीज़ )

अस्य गुणा भेदादयश्च—

कपर्दः कटुतिक्तोष्णः कर्णशूलव्रणापहः ।
शूलगुल्मामयघ्नश्च नेत्रदोषनिकृन्तनः ॥
वराटिका त्रिधा प्रोक्ता श्वेता शोणा त्रिधा परा ।
पीता च तीक्ष्णा चक्षुष्या श्वेता शोणा हिमा व्रणा ॥
अतिबिन्दुभिरश्वेतैर्लाञ्छिता रेखयाऽथवा ।
बालग्रहहरा नानाकौतुकेषु च पूजिता ॥
पीता गुल्मयुता पृष्ठे रसयोगेषु योजयेत् ।
सार्धनिष्कप्रमाणाऽसौ श्रेष्ठा योगेषु योजयेत् ॥
निष्कप्रमाणा मध्या सा हीना पादोननिष्किका ॥

३९ शङ्खः ( शंख ) पृ० २६७

हि०-संख, शंख । सं०-शङ्खः । प०-क०-मा०-गु०-शंख । म०-शंखो । बं०-शंख, शांक । द्रा०-शंखं । ते०-शंखमु । अं०-Cönch ( कोंच ) ।

व्यवहार-भस्म । मात्रा-३ रत्ती से १ माशा ।

अस्य गुणाः प्रकारभेदाश्च—

शङ्खस्तु पौष्टिको बल्यो रसकाले कटुः स्मृतः ।
पटुः शीतो ग्राहकश्च चक्षुष्यो वर्णकृन्मतः ॥
नेत्रपुष्पं पक्तिशूलं गुल्मं संग्रहणीं हरेत् ।
तारुण्यपिटिकागुल्मशूलश्वासहरः स्मृतः ॥

दक्षिणावर्त्तशङ्खस्तु त्रिदोषकामलाऽपहः ।
विषदोषक्षयनेत्रग्रहपीडाविनाशकः ॥ ( रत्नाकरे ) ॥
द्विधा स दक्षिणावर्त्तिर्वामावर्त्तिस्तु भेदतः ।
दक्षिणावर्त्तशङ्खस्तु पुण्ययोगादवाप्यते ॥
यद्गृहे तिष्ठति स वै स लक्ष्म्या भाजनं भवेत् ॥

श्रेष्ठशङ्खस्य लक्षणम्—

शङ्खस्तु विमलः श्रेष्ठश्चन्द्रकान्तिसमप्रभः ।
अशुद्धो गुणदो नैव शुद्धस्तु सुगुणप्रदः ॥

कृमिशङ्खस्य नामानि गुणाश्च—

कृमिशङ्खः कृमिजलजः कृमिवारिश्च जन्तुकम्बुश्च ।
कथितो रसवीर्याद्यैः कृतनिधिभिः शङ्खसदृशोऽयम् ॥

४० बोलम् ( बोल ) पृ० २६७

हि०-बोल, गन्धरस, हीराबोल, बीजाबोल, रक्ताबोल , खून खरबा । बं०-गन्धबोल, हिराबोल, खुनखरापी, गंधरस । म०-क०-गु०-बोल । ते०-बालिम् , त्रोपोलम् , बोलमु । ता०-बेल्लरप्पालम, बेल्ल इप्प पोलम । मु०-रक्त्याबोल । प०-मा०-बीजाबोल । गु०-हीराबोल । क० मुसाम्बर, बोल । द्रा०-करियपोलम् । फा०-मुर, मिर, मरमकी । अ०-मुरमकी, मुरसाफ़, मुर । मा०-बालंतबोल । अं०-Myrrha ( मिर्हा )

ले०-Balsa Mondendron Myrrha ( बालसा मोण्डेण्ड्रन मिर्हा )

१ काला २ लाल और ३ मनुष्यज इन भेदों से बोल ३ प्रकार का होता है । इनमें—

१ कालाबोल—को मुसब्बर,

२ मनुष्यजबोल—को मिमियाई या मोमियाई कहते हैं ।

३ लालबोल-एक वृक्ष का लालरंग का गोंद है ।

यह स्वाद में फीका और कड़वा होता है ।

४१ कङ्कुष्ठः ( मुरदा संग ) पृ० २६७

हि०-मुरदासंग, मुरदासिंग, मुरदारसंग, मुरदाशंख, कंकोठ । बं०-पर्वतीय मृत्तिका विशेष । म०-कंकुष्ठ, मुरदारसिंग । गु०-पीलिया ।

फा०–मुरदार संग ।

व्यवहार–खनिज शुद्ध । मात्रा–४ रत्ती से १ माशा ।

कङ्कुष्ठं पित्तकृद् भेदि विबन्धकफगुल्मनुत् ।
भजेदेनं विरेकार्थं ग्राहिभिर्यवमात्रया ॥
नाशयेदामपूतिं च विरेच्यं त्रणमात्रतः ।
सुभक्षितं च ताम्बूलं विरेकं त विनाशयेत् ॥

वैज्ञानिकों का मत है कि—Garcinia Morcella ( गारसिनिया मोरसेल्ला ) नामक वृक्ष के गोंद Gambage ( गेमबेज ) को कंकुष्ठ कहते हैं, उक्त वृक्ष के रस को नलिकाओं में रखने से जो बनता है उसे "नलिकाख्य" और अन्यान्य पात्रों में रखने से जो खण्ड २ रहता है उसे "रेणुक" कहते हैं ।

## अथ रत्नानि ।

### ४२ हीरकः ( हीरा ) पृ० २६८

हि०–हीरा, हीर । बं०–हीरे, हीरक । म०–हिरा । गु०–हिरो । फा०–इल्माश । मा०–हारो । प०–हीरा । क०–वज्र । ते०–वज्रं । अ०–मास, अल्मास । अं०–Diamond ( डायमण्ड ) ।

ले०–Pure Carbon Adams ( प्योर कार्बन एडम्स )

हीरा का रंग रूप—

हमारे देश की प्राचीन खानों से प्राप्त होने वाले हीरे प्रायः स्फटिकवत् स्वच्छ हुआ करते थे, कहीं २ के हीरे कुछ वर्णयुक्त जैसे–नीले, भूरे, श्याम, बैंगनी, सरदई, पिङ्गल, कपिल और अरुण आदि अनेक रङ्ग के भी देखे गये हैं ।

### ४३ गारुत्मतम् ( पन्ना ) पृ० २६९

हि०–पन्ना । बं०–पाना, पान्ना । पं०–पन्ना । क०–पाचिपच्चे । म०–पांचरत्न, पाचूरत्न, पन्नो । गु०–पाना, पानु, लीलुं । फा०–जमुरद, जमुर्रद । ते०–नालम ।

अं०–Emerald ( इमरल्ड ) । ले०–Smaragolus ( स्मेरेगोलस )

मरकतगुणाः—

पाचिका शीतला रुच्या रसकाले मधु स्मृता ।
पुष्टिकृद्विषहा वृष्या भूतबाधाऽम्लपित्तहा ॥
ज्वरच्छर्दिविषश्वाससन्तापाग्नेयमान्द्यनुत् ।
दुर्नामपाण्डुशोफघ्नं तार्क्ष्यमोजोविवर्द्धनम् ॥

मरकतमणिपरीक्षा—

स्वच्छं गुरु स्निग्धगात्रं च मार्दवसमेतं व्यङ्गं बहुरङ्गम् ।
शृङ्गारी मरकतं बिभृयात् ।
शर्करिलं रूक्षं मलिनं लघु हीनकान्ति कल्मषं त्रासयुतं विकृताङ्गं मरकतममरोऽपि नोपयुञ्जीत ।

४४ माणिक्यम् ( मानिक्य-चुन्नी ) पृ० २६१

हि०-मानिक, चुन्नी, लाल । ब०-माणिक । म०-माणिक । गु०-माण्यक, चुनी । क०-माणक । ते०-माणिक्यं । पं०-लाल । मा०-माणक । फा०-यांकूत । अ०-लाल बदख्शां । अं०-Ruby ( रूबी )
ले०-Rubinus ( रुबिनस )

यह दो प्रकार का होता है, १ रक्तवर्ण का, २ कुछ नीलापन युक्त, ये दोनों क्रम से लाल कमल और नीले कमल के समान एक लाल दूसरा कुछ नीलेरंग का होता है ।

माणिक्यगुणाः—

माणिक्यं लेखनं शीतं कषायं मधुरं सरम् ॥
चक्षुष्यं मङ्गलं दाहदुष्टग्रहविषापहम् ॥

माणिक्यभेदवर्णाः—

सिंहले तु भवेद्रक्तं पद्मरागमनुत्तमम् ।
पीतं काणपुरोद्भूतं कुरुविन्दमिति स्मृतम् ॥
अशोकपल्लवच्छायमिदं सौगन्धिकं विदुः ।
तुम्बुरुच्छायमानीलं नीलगन्धि प्रकीर्त्तितम् ॥
उत्तमं सिंहलोद्भूत निकृष्टं तुम्बुरूद्भवम् ।
मध्यमं मध्यमं ज्ञेयं माणिक्यं क्षेत्रभेदतः ॥

**बहुमूल्यमाणिक्यगुणाः—**

बन्धूकगुञ्जाशकलेन्द्रगोपाजपासुमासृक्समवर्णशोभाः ।
भ्राजिष्णवो दाडिमबीजवर्णास्तथाऽपरे किंशुकपुष्पभासः ॥
सिन्दूरपद्मोत्पलकुङ्कुमानां लाक्षारसस्यापि समानवर्णाः ।
चकोरपुंस्कोकिलसारसानां नेत्रावभासश्च भवन्ति केचित् ॥
क्वचित्तु स्फाटिकोत्थानां देशे तुवरसंज्ञके ।
सधर्माणः प्रजायन्ते स्वल्पमूल्या हि ते स्मृताः ॥
वर्णानुयायिनस्तेषां रन्ध्रदेशे तथाऽपरे ।
यज्जायन्ते तु ते केचिन्मौल्यलेशमवाप्नुयुः ॥
शोभाद्वितयवन्तो ये मणयः क्षतिकारकाः ।
उभयत्र पदं येषां तेन च स्यात् पराभवः ॥

**अथ प्रमाणम्—**

गुञ्जाफलप्रमाणस्तु दशसप्तकगुञ्जकात् ।
पद्मरागस्तुलयति यथापूर्वमह गुणः ॥
बिम्बीफलसमाकारः षडष्टदशतोलकः ।
पद्मरागस्तुलयति यथोत्तरमहागुणः ॥
अतः परं प्रमाणेन मानेन न च लक्ष्यते ॥

**अथ मूल्यम्—**

षट्त्रिंशतिसहस्राण्येकमणेः पलप्रमाणस्य ।
कर्षत्रयस्य विंशतिरुपरिष्टात् पद्मरागस्य ॥
अर्धपलस्य द्वादश कर्षस्यैव षट् सहस्राणि ।
यच्चाष्टमाषकमितं तस्य सहस्रत्रयं मौल्यम् ॥
माषचतुष्टयं यत् स्यात्तस्य दशशतं मौल्यम् ।
माषद्वयमितो यस्तु पद्मरागः सुनिर्मलः ॥
तस्य पञ्चशतं मौल्यं रौप्यं कर्षस्य चेरितम् ।
माषकैकमितो यस्तु पद्मरागो गुणान्वितः ।
शतैकसंमितं वाच्यं मौल्यं तस्य विचक्षणैः ।
अतो न्यूनप्रमाणास्तु पद्मरागा गुणोत्तराः ।

स्वर्णाद् द्विगुणमौल्येन मूल्यं तेषां प्रकल्पयेत् ।
व्रणे तु मूल्यं चार्द्धं तेजोहीनस्य मूल्यमष्टांशः ॥
अल्पगुणो बहुदोषो मूल्यं नाप्नोति विंशांशम् ॥

**रत्नपरीक्षा—**

बालार्ककरसंस्पर्शाद्यः शिखां लोहितां वमेत् ।
रञ्जयेदाश्रयं वाऽपि स महागुण उच्यते ॥
दुग्धे शतगुणे क्षिप्तो रञ्जयेद् यः समन्ततः ।
वमेच्छिखां लोहितां वा पद्मरागः स उत्तमः ॥
अन्धकारे महाघोरे यो न्यस्तः सन्महामणिः ।
प्रकाशयति सूर्याभः स श्रेष्ठः पद्मरागकः ॥
पद्मकोशेषु यो न्यस्तः प्रकाशयति तत्क्षणात् ।
पद्मरागवरो ह्येष देवानामपि दुर्लभः ॥
सर्वारिष्टप्रशमनं सर्वसंपत्तिदायकः ।
बालार्काभिमुखं कृत्वा दर्पणे धारयेन्मणिम् ॥
तत्र कान्तिविभागेन छायाभागं विनिर्दिशेत् ।
अप्रणश्यति सन्देहे शिलायां परिघर्षयेत् ॥
घृष्टो योऽत्यन्तशोभावान् परिमाणं न मुञ्चति ।
स ज्ञेयः शुद्धजातीयो ज्ञेयाश्चान्ये विजातयः ॥
अत्यन्तलोहितो यश्च पद्मरागः स उच्यते ॥

४९ पुष्परागः ( पुखराज ) पृ० २६९

हि०-पुखराज, पोखराज । बं०-पोखराज, पुष्पराज । म०-पुष्कराज । गु०-पीलुरत्न, पुखराज । क०-पुष्पराग । ते०-पुष्परागं ।

अं०-Topag ( टोपाज़ ) ।

ले०-Topagio ( टोपाजियो ) ।

**पुष्परागगुणाः—**

पुष्परागोऽम्लः शीतः स्याद्वातलोऽग्नेश्च दीपनः ।
वृष्यो वयःस्थापकश्च प्रज्ञाबुद्धिविवर्द्धनः ॥
वातनाशकरः प्रोक्तो मुनिभिः पारदर्शिभिः ।

पुष्परागलक्षणम्—

पुष्परागं गुरु स्निग्धं स्वच्छं स्थूलं समं मृदु ।
कर्णिकारप्रसूनाभं मसृणं शुभमष्टधा ॥
कृष्णं विद्धाङ्कितं व्यङ्गं धवलं मलिनं लघु ।
विच्छायं शर्कराभागं पुष्परागं सदोषलम् ।

४६ नीलम् ( नीलम ) पृ० २६९

हि०-नीलम, नीलमणि, नीलमनि । बं०-इन्द्रनील, नीलमणि । म०-नीलरत्न । गु०-नीलम्, कालुनंग । क०-नील । ते०-नीलं । फा०-याक़ूत । अ०-याक़ूत कबूद । अं०-Saffire ( सेफायर ) । ले०-Saffirus ( सेफायरस )

नीलगुणाः—

श्वासकासहरं वृष्यं त्रिदोषघ्नं सुदीपनम् ।
विषमज्वरदुर्नामपापघ्नं नीलमीरितम् ॥
नीलः सतिक्तकोष्णश्च कफपित्तानिलापहः ।
यो दधाति शरीरे च सौरिमर्दनदो भवेत् ॥

नीलस्य वर्णभेदाः—

सितशोणपीतकृष्णच्छाया नीलाः क्रमादिमे कथिताः ।
विप्रादिवर्णसिद्ध्यै धारणमस्यापि वज्रवत् फलदम् ॥

यह दो प्रकार का मिलता है । १ इन्द्रनील । २ जलनील । इनमें से प्रथम उत्तम होता है ।

४७ ( गोमेदः ) पृ० २६९

हि०-गोमेदमणि, राहुरत्न, जवाहर । बं०-गोमेदमणि, लोहितमणि । ते०-गोमेदकं । क०-गोमेद । म०-गोमेदमणि । गु०-गोमूत्रजेवुं पीला रङ्गनुं । अं०-Onyx ( ओनिक्स ) । लै०-Onyx ( ओनिक्स ) ।

गोमेदनामानि—

पिङ्गस्फटिको गोमेदोऽगस्तिसत्त्वं तमोमणिः ।

अस्य गुणाः—

गोमेदकोऽम्लश्चोष्णश्च वातकोपविकारनुत् ।
दीपनः पाचनश्चैव धृतोऽयं पापनाशनः ॥

अस्य परीक्षा—

हिमालये वा सिन्धौ वा गोमेदमणिसम्भवः।
स्वच्छकान्तिगुरुः स्निग्धो वर्णाढ्यो दीप्तिमानपि ॥
वलक्षः पिञ्जरो धन्यो गोमेद इति कीर्त्तितः।
चतुर्धा जातिभेदस्तु गोमेदोऽपि प्रशस्यते ॥
ब्राह्मणः शुक्लवर्णः स्यात्क्षत्रियो रक्त उच्यते।
आपीतो वैश्यजातिस्तु शूद्रस्तु नील उच्यते ॥
छाया चतुर्विधा श्वेता रक्ता पीताऽसिता तथा।
गुरुप्रभाऽऽढ्यः सितवर्णरूपः स्निग्धो मृदुर्वाऽतिमहापुराणः।
स्वच्छस्तु गोमेदमणिर्धृतोऽयं करोति लक्ष्मीं धनधान्यवृद्धिम् ॥
लघुविरूपोऽतिखरोऽन्यमानः स्नेहोपलिप्तो मलिनः खरोऽपि।
करोति गोमेदमणिर्विनाशं सम्पत्तिभोगाबलवीर्यराशेः ॥
ये दोषा हीरके ज्ञेयास्ते गोमेदमणावपि।
परीक्षा वह्नितः कार्या शाणे वा बहुकोविदैः।
स्फटिकेनैव कुर्वन्ति गोमेदप्रतिरूपिणम्।
शुद्धस्य गोमेदमणेस्तु मूल्यं सुवर्णतो द्विगुणमाहुरेके।
अन्ये तथा विद्रुमतुल्यमूल्यं तथाऽपरे चामरतुल्यमाहुः ॥
चतुर्विधानामेषां तु धारणं परिसम्मतम्। युक्तिकल्पतरुः ॥

४८ वैदूर्यम् ( वैदूर्य्यमणि—लहसुनिया ) पृ० २६९

हि०—वैडूर्यमणि, लहसुनिया। बं०—वैदूर्य। म०—वैडूर्य्य रत्न। गु०—लसणियो। क०-वैडूर्य। अं०-Cats Eye ( कैट्स् आइ )

अस्य गुणाः—

वैदूर्यमुष्णमम्लञ्च कफमारुतनाशनम्।
गुल्मादिदोषशमनम् भूषितञ्च शुभावहम् ॥ रा० नि० ॥

उत्तमवैदूर्यलक्षणम्—

वैदूर्यं श्यामशुभ्राभं समस्वच्छं गुरु स्फुटम्।
अमच्छुभ्रान्तरीयेण गर्भितं शुभमीरितम् ॥

४९ मौक्तिकम् ( मोती ) पृ० २७०

हि०—मोती। बं०—मुक्ता। गु०—मोती। तै०—मोत्यालु, मात्यालु

म०-मोती। क०-मौक्तिक। फा०-मरवारिद, मूर्वारीद, दुर। अ०-लोलो, लुलु। अं०-Pearl (पर्ल)। ले०-Margarita (मार्गारिटा)।

अस्य गुणाः—

मौक्तिकं सुमधुरं सुशीतलं दृष्टिरोगशमनं विषापहम्॥
राजयक्ष्मपरिकोपनाशनं क्षीणवीर्यबलपुष्टिवर्द्धनम्॥
कफपित्तक्षयध्वंसि कासश्वासाग्निमान्द्यजित्।
पुष्टिदं वृष्यमायुष्यं दाहघ्नं मौक्तिकं मतम्॥
मुक्तानां हारविधृतिर्दाहपित्तविनाशिनी।
कान्तिं हर्षं नेत्रसुखं ददातीति प्रकीर्त्तितम्॥ नि० र०॥

शुक्तिमौक्तिकम्—

षट्स्वेतेष्वपि रुक्मिणीव जगति ख्यातिं गता रुक्मिणी-
नाम्ना शुक्तिरतीव चोत्तमगुणा सिन्धौ समुज्जृम्भते।
तस्या गर्भभवन्तु कुङ्कुमनिभं जातीफलाकारकं-
स्थूलं स्निग्धमतीव निर्मलतमं भूमौ प्रकाशं सदा॥

शङ्खमौक्तिकम्—

शङ्खस्याच्युतहारिणो जलनिधौ ये वंशजाः कम्बुका-
स्तेष्वन्तः किल मौक्तिकं भवति वै तच्छुक्रतारानिभम्।
कापोताण्डसमं सुवृत्तमसकृच्छ्रीकं सरूपं लघु-
स्निग्धं स्पर्शकृतं हि तच्च न पुनर्मर्त्यैस्तदासाद्यते॥

गजमौक्तिकम्—

यद्दन्तावलकुम्भसम्भवमदः पीतारुणं मन्दरुग्।
धात्रीदघ्नतयाऽत्र रत्नमधमं काम्बोजकुम्भोद्भवम्॥

वाराहमौक्तिम्—

एकाकी ससुखेन निःस्पृहतया यः काननं गाहते
तस्यैवादिवराहवंशजनुषः कोलस्य मूर्ध्नि स्थितम्।
कङ्कोलाकृतिमिन्दुवत्सुधवलं दैवादवाप्नोति तद्-
यस्तं धारयते भवेत्स निधिभिर्मर्त्यो धनाधीशवत्॥

सर्पजमौक्तिकम्—

शेषस्यान्वयिनां फणासु फणिनां यन्मौक्तिकं जायते-
वृत्तं निर्मलमुज्ज्वलं शशिरुचि श्यामच्छवि श्रीकरम् ।
कङ्कोलाकृति कोऽपि कोटिसुकृतैः प्राप्नोति चेन्मानवः-
स स्याद्वाजिगजाधिको नृपसमो जातोऽपि नीचे कुले ॥
आस्ते सद्मनि चेत्स पन्नगमणिस्तं यातुधानामरा-
हर्तुं रन्ध्रमवेक्षते इतरतः कुर्यान्महाशान्तिकम् ।

मत्स्यजमौक्तिकम्—

प्रोष्ठीगर्भगतस्तु मौक्तिकमणिर्गोजैः समः पाटली-
पुष्पाभः स न लक्ष्यते भुवि जनैरस्मिन् कलौ पापिभिः ॥

दर्दुरमौक्तिकम्—

यन्मेघोदरसंभवं तदवनीमप्राप्तमेवामरै-
र्व्योमस्थैरपनीयते विनियतं वर्षासु मुक्ताफलम् ।
तिग्मांशोरपि दुर्निरीक्ष्यमकृशं सौदामिनीसंनिभम् ।
देवानामपि दुर्लभं न मनुजस्यैतस्य लाभः पुनः ॥

वेणुमौक्तिकम्—

मुक्ताः सन्ति कुलाचलेषु करकाकान्त्युद्भवा वंशजाः-
कर्कन्धूफलबन्धवो निदधते कण्ठेषु सिद्धाङ्गनाः ॥

मुक्तालक्षणम्—

श्वेतस्निग्धमतीवबन्धुरतरं स्यात्पारसोकोद्भवं-
रूक्षं काञ्चनवर्णसङ्करयुतं स्याद् बार्बरं मौक्तिकम् ।
शोणं तूर्मजसंभवं विदुरतिस्निग्धं तथा दोषजं-
चातुर्वर्ण्ययुतं सुलक्षणमिति श्लक्ष्णं कविश्रीकरम् ॥

मुक्तापरीक्षा—

यद्विच्छायं मौक्तिकं व्यङ्गकायं शुक्तिस्पर्शं रक्ततां चापि धत्ते ।
मत्स्याक्षाङ्कं रूक्षमुत्ताननिम्नं नैतद्धार्यं धीमता दोषदायि ।
नक्षत्राभं वृत्तमत्यन्तमुक्तं स्निग्धं स्थूलं निर्व्रणं निर्मलञ्च ।
न्यस्तं धत्ते गौरवं यत्तुलायां निर्मौल्यं तन्मौक्तिकं सिद्धिदायि ॥

एक पात्र में आधसेर गोमूत्र, आध छटाक सांभर नोन, डाल उसी में

दे। प्रहर पर्यन्त मोती को दोलायन्त्र द्वारा पकावै फिर निकाल कर धान की भूसी में डाल कर मलै और पानी से धो डालै, यदि मोती का रूपान्तर न हो तो उसे शुद्ध समझ सेवन करना चाहिये ।

९० प्रवालः ( मूँगा ) । पृ० २७०

हि०—मूंगा । बं०—पला, मुंगा । म०—पोवलें । गु०—परवाला, परवाली । क०—अवलेहवत । तै०—प्रवाळक, पागड़ालु, पगड़मु । फा०—मिरजाना, मिरगां, मिरजां, मरजान् । अ०—एहेम, खुसूसुद, कोरल, वसद् । प०—मा०—मूंगा । क०—हुबलबु, । द्रा०—पवलं ।

अं०—Red Coral ( रेड कोरल )

ले०—Coralium Rubrum ( कोरेलियम रुब्रम् )

व्यवहार—शुद्धभस्म । मात्रा-२-६ रत्ती ।

अस्य गुणाः—

प्रवालं मधुरं साम्लं कफपित्तादिदोषनुत् ।
वीर्यकान्तिकरं स्त्रीणां धृते मङ्गलदायकम् ॥
क्षयपित्तास्रकासघ्नं दीपनं पाचनं लघु ।
विषभूतादिशमनं विद्रुमं नेत्ररोगहृत् ॥

अस्य मञ्जरीगुणाः—

प्रवालमञ्जरी सार्द्रा कामपुष्टिकरी नृणाम् ।
सेविता सततं देहे वीर्यस्तम्भं करोति च ॥

अस्योत्पत्तिर्लक्षणं च—

बालार्ककिरणारक्ता सागरसलिलोद्भवा च जलतापा ।
न त्यजति निजां रुचिं निकषे घृष्टाऽपि सा मृता जात्या ॥
पक्वबिम्बफलच्छायं वृत्तायतमवक्रकम् ।
स्निग्धमव्रणकं स्थूलं प्रवालं सप्तधा शुभम् ॥
आरङ्गं जलाक्रान्ति वक्रं सूक्ष्मं सकोटरम् ।
रूक्षं कृष्णं लघु श्वेतं प्रवालमशुभं त्यजेत् ॥

## अथोपरत्नानि । पृ० २७०

### ५१ वैक्रान्तमणिः ।

हि०—वैक्रान्त, वैक्रान्तमणि, गोनस, गोनास। बं०-चुनिविशेष।

सं०—वैक्रान्तं चैव विक्रान्तं नीलवज्रं कुवज्रकम्।
गोनासः क्षुद्रकुलिशं जीर्णवज्रं च गोनसम्॥

अस्य गुणाः—

वैक्रान्तस्तु त्रिदोषघ्नः षड्रसो देहदार्ढ्यकृत्।
पाण्डूदरज्वरश्वासकासक्षयप्रमेहनुत्॥

### स्फटिकः ( बिल्लौर )

हि०—बिल्लौर, फटिकमणि, स्फटिकमणि। बं०—फटिक। म०—स्फटीक। अ०-इज्ररुल, बिल्लौर। सं०-शैवः, शूकः, श्वेतरत्नं, स्फटिकः, निस्तुषोपलम्। अं०—क्रिष्टल।

अस्य गुणाः—

स्फटिकः समवीर्यः स्यात् पित्तदाहार्त्तिशोषनुत्।
तस्याक्षमाला जपतो धत्ते कोटिगुणं फलम्॥ नि० र०॥

यह एक प्रकार का सफेद पत्थर कांच के समान चिकना और स्वाद में फीका होता है।

### ५२ काचः ( कांच ) पृ० २७०

हि०-कांच, काच, शीशा, ग्लास। सं०-काचः, कृत्रिमरत्नम्। बं०-कंच, काच। गु०-काच। म०-काच। फा०-आबगीना।

अं०-Glass ( ग्लास )। ले०-Glesum ( ग्लेसम )।

संस्कृतनामानि—

काचः कृत्रिमरत्नं च पिङ्गाणो मुकुरोऽपि च।

अस्य गुणाः—

काचा तु सारका लघ्वी व्रणनेत्रहितावहा।
लेखनी शूलहृत्प्रोक्ता वैद्यशास्त्रविशारदैः॥

### ( सूर्यकान्तमणिः )

हि०-आतसीशीशा ( सीसा ), सूरजकान्त, चकमक शीशा। बं-आतस पाथर, आतस पत्थर। म०-सूर्यकान्तमणि। गु०-अगनचशमानो

काच । अं०-Magnifying Glass. ( मैगनिफाइङ्ग ग्लास ) ।

**अस्य नामानि गुणाश्च—**

दीप्तोपलः सूर्यकान्तो ज्वलनाश्माऽग्निगर्भकः ।
सूर्यकान्तो भवेदुष्णो निर्मलश्च रसायनः ॥
वातश्लेष्महरो मेध्यः पूजनाद्रवितुष्टिदः । ( रा० नि० )

**अस्योत्तमतालक्षणम्—**

शुद्धः स्निग्धो निर्व्रणो निस्तुषस्तु यो निर्घृष्टो व्योमनैर्मल्यमेति ।
यः सूर्यांशुस्पर्शनिष्ठ्यूतवह्निर्जात्या सोऽयं चक्षते सूर्यकान्तः ॥

( चन्द्रकान्तमणिः )

सं-चन्द्रकान्तः, सोममणिः, सिताश्मा, प्रस्तरोपलः । हि०-बं०-क०-चन्द्रकान्त । म०-चन्द्रकान्तमणि । तै०-चन्द्रकान्तम् ।

**अस्य गुणाः—**

चन्द्रकान्तमणिः शीतः स्निग्धः स्वच्छः शिवप्रियः ।
अस्रदाहग्रहालक्ष्मीनाशनोऽयं निरन्तरम् ॥

**एतदुद्भूतजलस्य गुणाः—**

चन्द्रकान्तोद्भवं रूक्षं शीतं दाहविनाशनम् ।

**अस्य स्वरूपम्—**

पूर्णेन्दुकरसंस्पर्शादमृतं स्रवति क्षणात् ।
चन्द्रकान्तं तदाख्यातं दुर्लभं तत्कलौ युगे ॥ यु० क० ॥

पेरोजम् ( फिरोजा )

हि०-फिरोजा, पिरोज़ा, पेरोज़ा । सं०-पेरोजम् । बं०-उपरत्न विशेष, पेरोजा । गु०-पीरोजा, पीरोजो । फा०-फिरोज़ा । ०-फ़िरोजा । म०-पेरोज । अ०-फिरोजजं । अं०-Tirkois ( टरकोआयज़ ) ।

ले०-Terchesins Turchina ( टर्चेसिन्स टरचाइना )

**पेरोजनामानि—**

पेरोजं हरिताश्मा च भस्माङ्गं हरितं द्विधा ।

**अस्य गुणाः—**

पेरोजं सुकषायं स्यान्मधुरं दीपनं परम् ।
स्थावरं जङ्गमं चैव संयोगाच्च तथा विषम् ।

तत्सर्वं नाशयेच्छीघ्रं शूलं भूतादिदोषजम् ॥

दुग्धपाषाणिका ( शिरगोला )

सं०-दुग्धपाषाणः । हि०-बं०-म०-शिरगोला। गु०-दुधियो पाणो। क०-रंगवालियहरेल्ल।

अस्या नामानि गुणाश्च—

दुग्धपाषाणिका क्षीरी माधवी मेदसन्निभा ।
दुग्धपाषाणको रुच्य ईषदुष्णो ज्वरापहः ।
पित्तहृद्रोगशूलघ्नः कासाध्मानविनाशनः ॥

९३ मुक्ताशुक्तिः ( मोती की सीप ) पृ० २७०

सं०-शुक्तिर्मुक्ताप्रसूश्चैव महाशुक्तिश्च शुक्तिका ।
मुक्तास्फोटोऽब्धिमण्डूकी मौक्तिकप्रसवा च सा ॥

हि०-सी ( र्शी ) प, मोती की सीप। बं०-झिनुक। पं०- सीप। म०-मोत्यां ची शिंप, मोती सींप। गु०-मोती नी छीप । क०—मुक्ति नी सिंपु। मा०-खीपड़ी। फा०-गोशमाही। अ०-सदफ।

अं०-Oyster shell ( ओएष्टर शेल )।
,, Shell fish ( शेल फिश )।

अस्य गुणाः—

मुक्ताशुक्तिस्तु मधुरा स्निग्धा रुच्या च दीपनी ।
कटूवी च कासशूलघ्नी हृद्रोगस्य च नाशिनी ।
स्नायुरोगहरी चैव ज्वरघ्नी व्रणभेदिनी ॥ रा० नि० ॥

इसके भेदों में से दो मुख्य भेद हैं—१ बिलकुल गोलाई युक्त चौड़े मुखकी, २ कर्णिका की भांति की। इनमें दूसरी ओषधि के काम की है, पहली हीनगुण की है। जिसका भीतर का पर्त्त बिलकुल साफ न हो किन्तु फुंसियों के समान उभारों से भरे हों ऐसी 'मुक्ता शुक्ति' उत्तम होती है।

जलशुक्तिः ( जलसीप )

हि०-जलसीप, नदीसीप, सितुहा, सितुही। सं०-जलशुक्तिः। म०-नदी तील शींप। क०-तौरेय सिंपु। ब०-शामुक। गु०-नदीनां छिपनां।
अं-shell ( शेल )।

अस्या नामानि गुणाश्च—

जलशुक्तिर्वारिशुक्तिः कृमिसूः क्षुद्रशुक्तिका ।
शम्बूका जलडिम्बश्च पुटिका तोयशुक्तिका ॥
जलशुक्तिः कटुः स्निग्धा दीपनी पाचका च सा ।
रुच्या बलप्रदा गुल्मनाशिनी चक्षुषोर्हिता ।
विषदोषं च शूलं च नाशयेदिति कीर्त्तिता ॥ रा० नि० ॥

९४ शङ्खभेदः क्षुद्रशङ्खः ( घोंघा ) पृ० २७०

हि०–घोंघा, छोटा शंख । बं०–शामुक । म०–धुके ।

सं०–कोशस्था लघुशङ्खास्तु क्षुद्रकाः क्षुल्लकास्तथा ।
शङ्खनकाश्च शम्बूकाः क्षुद्रशङ्खा नदीभवाः ।

अस्य गुणाः—

शम्बूकाः शीतला नेत्ररुजास्फोटविनाशिनः ।
शीतज्वरहरास्तीक्ष्णा ग्राहिदीपनपाचनाः ॥

---

## अथ विषम् ।

९५ तत्र वत्सनाभः । पृ० २७१

हि०–वत्सनाभ विष, वत्सनाग, अमृतविष, मीठाविष, वच्छनाग, वचनाग, मीठातेलिया, डकरा । बं०–कटविष, मीठाविष, अमृतविष, विष । म०–वचनाग । गु०–बच्छनाग, छिगडियो । क०–वसनवी । ते०–नाभि, वसनाभि । पं०–सिंगिया विष । मा०–सिंगीमोरो । द्रा०–क०–वत्सनाभि ।

अं०–Aconite ( एकोनाइट )

ले०–Aconitum Ferox ( एकोनाइटम फेरोक्स )

आज कल के वत्सनाभ का आकार बछड़े के नाभि के समान नहीं होता बल्कि–गाजर के आकारवाला गावदुम होता है । जिसको "मीठातेलिया" कहते हैं वह प्रायः कृत्रिम होता है, उक्त वत्सनाभ या श्वेतवत्सनाभ को त्रिफले के काढ़े और तेल में पकाकर बनाते हैं, यह कालेरंग का तेल में भीगा सा रहता है ।

वत्सनाभोऽतिमधुरः सोष्णो वातकफावहः।
कण्ठरुक्सन्निपातघ्नः पित्तसन्तापकारकः॥ रा० नि०॥

९६ हारिद्रविषम्। पृ० २७१

हि०-हलदियाविष, हलदुआ विष। सं०-हारिद्रविषम्, हारिद्रकविषम्, ग्रन्थिविषम्।

९७ शृङ्गिकविषम्। पृ० २७१

हि०-शिंगि ( घि ) या विष, सिंगीमुहरा, सिंघो, मोहरा।

अस्य शुद्धिः—

विषं तु खण्डशः कृत्वा वस्त्रखण्डेन बन्धयेत्।
गोमूत्रमध्ये निक्षिप्य स्थापयेदातपे त्र्यहम्॥
गोमूत्रं च प्रदातव्यं नूतनं प्रत्यहं बुधैः।
त्र्यहेऽतीते समुद्धृत्य शोषयेन्मृदु पेषयेत्॥
शुद्धयत्येवं विषं तच्च योग्यं भवति चार्त्तिजित्।
एकाष्टकं भवेद् यावदभ्यस्तं तिलमात्रया॥
सर्वरोगहरं नृणां जायते शोधितं विषम्।
अतिमात्रं यदा भुक्तं तदाऽऽज्यं टङ्कणं पिबेत्।
विषं सवेगतो नाशमाशु प्राप्नोति निश्चितम्॥

९८ कालकूटविषम्। पृ० २७१

ते०-कर्कोटकविषमु।

९९ ब्रह्मपुत्रः। पृ० २७२

इसके अलावा "संखियाविष" का नामादि कहते हैं।

सं०-शतमल्ले तु मल्लः स्याद् गौरीपाषाणकस्तथा।
आखुपाषाणकश्चैव लोहशङ्करकारकः॥

हि०-शोमलखार, संखिया। म०-सोमळ, शंखिया। गु०-शोमल, शोमलखार, शंखियो। फा०-मिर्गवमूष। क०-सुंबुळखार।

अं०-Oxide of Arsenic ( आक्साइड ऑफ् आर्सेनिक् )

लै०-Oxidum Arsenicum ( आक्साइडम आर्सेनिकम )

आखुपाषाणकः स्निग्धः पारदस्य नियामकः।
लोहभेदकरश्चैव वीर्यकृत्कान्तिवर्द्धनः॥

त्रिदोषसर्वव्याधीनां नाशकः परिकीर्त्तितः ।
अशुद्धः स तु विज्ञेयः सप्तधातुविनाशकृत् ॥
दाहं चित्तभ्रमं चैव लालास्रावं तथा मृतिम् ।
अनेकवेदनाश्चैव बहुव्याधिं तृषां तथा ॥
करोत्यतो मूर्खहस्ते न दातव्यः कदा चन ।
तत्समीपे नैव वाच्यः प्राणघातकरो ह्यसौ ॥

६० विषस्य भेदादयः । पृ० २७२

स्थावरं जङ्गमञ्चैव द्विविधं विषमुच्यते ।
दशाधिष्ठानमाद्यं तु द्वितीयं षोडशाश्रयम् ॥

स्थावरविषस्य दश प्रकाराः—

मूलं पत्रं फलं पुष्पं त्वक्क्षीरं सारमेव च ।
निर्यासो धातवः कन्दः स्थावरस्याश्रया दश ॥

अस्य भक्षणदोषाः—

स्थावरं तु ज्वरं हिक्कां दन्तहर्षं गलग्रहम् ।
फेनवम्यरुचिश्वासमूर्च्छाश्च जनयेद्विषम् ॥

जङ्गमविषस्य षोडश प्रकाराः—

दृष्टिर्निःश्वासो दंष्ट्राश्च नखमूत्रमलानि च ।
शुक्रं लाला मुखं स्पर्शं सन्दंशं स्रावमर्दितम् ।
गुदास्थिपित्तशूकानि दश षड् जङ्गमाश्रयाः ॥

जङ्गमाश्रयजीवानां नामानि—

सर्पाः कीटोन्दुरा लूता वृश्चिका गलगोधिकाः ।
जलौकामत्स्यमण्डूकाः शलभाः सकृकण्टकाः ॥
श्वसिंहव्याघ्रगोमायुतरक्षुनकुलादयः ।
दंष्ट्रिणोऽमी विषं तेषां दंष्ट्रोत्थं जङ्गमं मतम् ॥

अस्य दोषाः—

निद्रां तन्द्रां क्लमं दाहं सपाकं लोमहर्षणम् ।
शोकं चैवातिसारञ्च जनयेज्जङ्गमं विषम् ॥

विषसेवनप्रकारः—

नानारसौषधैर्यैं तु दुष्टा यान्तीह नो गदाः ।

ते नश्यन्ति विषे दत्ते शीघ्रं वातकफोद्भवाः ॥
शरद्ग्रीष्मवसन्तेषु वर्षासु च प्रदापयेत् ।
चातुर्मास्ये हरेद्रोगान् कुष्ठलूताऽऽदिकानपि ॥
दातव्यं सर्वरोगेषु घृताशिनि हिताशिनि ।
क्षीराशिनि प्रयोक्तव्यं रसायनरते नरे ॥
ब्रह्मचर्यविधानं हि विषकल्पे समाचरेत् ।
पथ्ये स्वस्थमना भूत्वा तदा सिद्धिर्न संशयः ॥
आचार्येण तु भोक्तव्यं शिष्यप्रत्ययकारकम् ।
विषे शुद्धिर्हि तदपि मात्रया नान्यथा भवेत् ।
सर्वरोगप्रशमनं दृष्टिपुष्टिकरं विषम् ॥

विषसेवने पथ्यपदार्थाः—

घृतं क्षौद्रं सितां क्षीरं गोधूमांस्तण्डुलांस्तथा ।
मरिचं सैन्धवं द्राक्षां मधुरं पानकं हिमम् ॥
ब्रह्मचर्यं हिमं देशं हिमं कालं हिमं जलम् ।
विषस्य सेवको मर्त्यो भजेदतिविचक्षणः ॥

मात्राऽधिकभक्षणस्य परीक्षा—

मात्राऽधिकं यदा मर्त्यः प्रमादाद्भक्षयेद्विषम् ।
अष्टौ वेगास्तदा तेन जायन्ते तस्य देहिनः ॥
रोमाञ्चः प्रथमे वेगे द्वितीये वेपथुर्भवेत् ।
वेगे तृतीये दाहः स्याच्चतुर्थे पतनं भवेत् ॥
फेनस्तु पञ्चमे वेगे षष्ठे वैकल्यमेव च ।
जडता सप्तमे वेगे मरणं चाष्टमे भवेत् ॥
विषवेगानिति ज्ञात्वा मन्त्रतन्त्रैर्विनाशयेत् ।
यावन्नाष्टमवेगं तु संप्राप्नोतीह मानवः ॥

विषदूरीकरणोपायाः—

अतिमात्रं यदा भुक्तं वमनं तस्य कारयेत् ।
दद्यात्तावदजादुग्धं यावद्भ्रान्तिर्न जायते ॥
अजादुग्धं यदा कोष्ठे स्थिरीभवति देहिनः ।
विषवेगं ततो जीर्णं जानीयात् कुशलो भिषक् ।

विषं हन्याद्रसः पीतो रजनीमेघनादयोः ।
सर्पाक्षिटङ्कणं वाऽपि घृतेन विषहृत् परम् ॥
पुत्रजीवकमज्जा वा पीता निम्बकवारिणा ।
विषवेगं निहन्त्येव वृष्टिर्दावानलं यथा ॥

विधिसेवितविषगुणाः—

विषं रसायनं बल्यं वातश्लेष्मविकारनुत् ।
कटु तिक्तं कषायं च मदकारि सुखप्रदम् ॥
व्यवायि च शिरोद्दाहि कुष्ठवातास्रनाशनम् ।
अग्निमान्द्यश्वासकासप्लीहोदरभगन्दरम् ॥
गुल्मपाण्डुव्रणार्शांसि नाशयेद्विधिसेवितम् ॥

६१ अथोपविषाः । पृ० २७३

स्नुह्यर्कलाङ्गलीगुञ्जाहयारिविषमुष्टिकाः ।
जैपालोन्मत्ताहिफेनं नवोपविषजातयः ॥
एषां गुणा अतीते वर्गे तत्र तत्र द्रष्टव्याः ।

एषां शुद्धिः—

दोलायन्त्रेण पयसि स्थापयित्वा पचेद्दिनम् ।
एतेनैव विशुद्ध्यन्ति सर्वाण्युपविषाणि च ॥
चिञ्चापत्ररसे कर्षे वस्त्रपूतं पलद्वयम् ।
स्नुहीक्षीरं रौद्रयन्त्रे भावयेद्यत्नतः सुधीः ॥
द्रवे शुष्के समुत्तार्य सर्वरोगेषु योजयेत् ।
शेषाणामुपविषाणां शुद्धिस्तत्र तत्र द्रष्टव्याः ॥

इत्यष्टमो धात्वादिवर्गः समाप्तः ॥ ८ ॥

## अथ नवमो धान्यवर्गः ॥ ९ ॥

१ धान्यम् ( धान ) । पृ० २७३

